# NATYASIDDHANTHA

## BA SANSKRIT

### 2011 Admission onwards

### IV Semester

## CORE COURSE

# UNIVERSITY OF CALICUT


**SCHOOL OF DISTANCE EDUCATION**

CALICUT UNIVERSITY.P.O., MALAPPURAM, KERALA, INDIA – 673 635

# UNIVERSITY OF CALICUT

**SCHOOL OF DISTANCE EDUCATION**

STUDY MATERIAL

## BA SANSKRIT

IV Semester

CORE COURSE

NATYASIDDHANTHA

Prepared by:

*Dr. Ajitha.T.S*
*Assistant Professor,*
*Department of Sanskrit,*
*Sri. C. AchuthaMenon Govt. College,*
*Thrissur.*

Scrutinised by:

*Sri.K.Jayanarayanan,*

*Associate Professor,*
*Department of Sanskrit,*
*Sree Kerala Varma College,*
*Thrissur.*

Layout & Settings

Computer Section, SDE

©

Reserved

# CONTENTS


- **Module I** **04 - 12**
    - Kavyabheda - into Drsya and sravya
    - Rupaka
    - Types of rupakas
    - Nataka
    - Bharati Vrtti
    - Prastavana and its divisions
    - Itivrtta and its divisions
    - Arthopakshepakas
    - Arthaprakrtis and Avasthas.

- **Module II** **13 - 39**
    - Sandhi- its divisions
    - Different vrttis
    - Kaishikii, Arabhati and Sattvati
    - Lakshanas
    - Natyalankaras

- **Module III** **40 - 49**
    - Lasyangani
    - Mahanatakam
    - Prakaranam
    - Bhana
    - Vyayoga
    - Samavakara
    - Dima
    - Ihamrgah
    - Ankah
    - Vithi
    - Prahasanam.

- **Module IV** **50 - 60**
    - Uparapakas
    - Sravyakavyani
    - Padyam
    - Muktakam
    - Mahakavyam
    - Khandakavyam
    - Kosha
    - Gadya - its divisions
    - Champukavyas.

MODEL QUESTION PAPER

# MODULE- I

साहित्यदर्पणस्य षष्ठे परिच्छेदे विश्वनाथेन दृश्यकाव्यस्वरूपं निरूपितं। काव्यस्य दृश्यकाव्यं श्रव्यकाव्यमिति भेदद्वयं विद्यते।तत्र "दृश्यं अभिनेयं"। दृश्यकाव्यस्य नामान्तरमस्ति रूपकम्। यतः तद् दृश्यं काव्यं नटे रामादिस्वरूपारोपाद्रूपकमिति उच्यते। "तद्रूपारोपात्तु रूपकम् "। अभिनयो नाम - अवस्थानुकारः। स चतुर्विधः। आङ्गिकः वाचिकः आहार्यः सात्विकः च इति।




रूपकभेदाः

नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः

ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश।

अष्टादश उपरूपकाणि अपि सन्ति। तानि तु-

नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम्।

प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा।

संलापकं श्रीगदितं शिल्पकं च विलासिका।

दुर्मल्लिका प्रकरणी हल्लीशो माणिकेति च।

अष्टादश प्राहुरुपरूपकाणि मनीषिणः।

विना विशेषम् सर्वेषाम् लक्ष्म नाटकवन्मतम्॥

नाटकलक्षणं- साहित्यदर्पणे नाटकलक्षणम् एवम् दीयते-

नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम्।

विलासद्धर्यादिगुणवद्युक्तम् नानाविभूतिभिः।

सुखदुःखसमुद्भूति नानारसनिरन्तरम्

पञ्चादिका दशपरास्तत्राङ्काः परिकीर्त्तिताः।

प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान्।

दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः।

एक एव भवेदङ्गी शृङ्गारो वीर एव वा।

अङ्गमन्ये रसाः सर्वे कार्यो निर्वहणेद्भुतः॥

चत्वारः पञ्च वा मुख्याः कार्यव्यापृतपुरुषाः।

गोपुछाग्रसमग्रम् तु बन्धनं तस्य कीर्तितं॥

नाटकेषु इतिहासपुराणादिषु दृष्टं प्रसिद्धं इतिवृत्तं स्वीक्रियते। उदा- रामचरितम्। तत्र मुख- प्रतिमुख - गर्भ- अवमर्श- उपसंहृत्याख्याः पञ्चसन्धयः भवन्ति। विलासादीनां नायकगुणानां अभ्युदयाद्यवस्थानाम् बहुविधानां एश्वर्यानां च योगो तत्र दृश्यते। सुखदुःखमिश्रं इतिवृत्तं नानारसानां सान्निध्येन विचित्रं दृश्यते। नाटकेषु अङ्कानां संख्या पञ्च दश तन्मध्यस्था वा भवति। नाटके धीरोदात्तः प्रतापवान् उन्नतकुलजातः दिव्यः मनुष्यः वा नायकः भवति। उदा- दुष्यन्तः। शृङ्गारः वीरः वा मुख्यरसेन कल्प्येते। अन्ये रसाः अप्रधानरूपेण तिष्ठन्ति। प्रधानपुरुषाणां संख्या पञ्च चत्वारः वा भवन्ति। आङ्काः क्रमेण सूक्ष्माः कर्त्तव्याः।

## अङ्कलक्षणं

नाटकेषु गोपुच्छाग्रसमग्रं बन्धनं अङ्कानां कीर्तितम् इति उक्तं। तर्हि अङ्कलक्षणं किं इति उच्यते।

प्रत्यक्षनेतृचरितो रसभावसमुज्ज्वलः।

भवेदगूढशब्दार्थः क्षुद्रचूर्णकसंयुतः।

विच्छिनावान्तरैकार्थः किञ्चित्संलग्नबिन्दूकः।

युक्तो न बहुभिः कार्यैर्बीजसंहृतिमान्न च॥

नानाविधानसंयुक्तो नातिप्रचुरपद्यवान्।

आवश्यकानां कार्याणामविरोधाद् विनिर्मितः॥

नानेकदिननिर्वर्त्यकथया संप्रयोजितः।

आसन्ननायकः पात्रैर्युतस्त्रिचतुरैस्तथा।

दूराह्वानं वधो युद्ध राज्यदेशादिविप्लवः।

विवाहो भोजनं शापोत्सर्गौ मृत्यू रतं तथा।

दन्तच्छेद्यं नखच्छेद्यमन्यद् व्रीडकरं च यत्।

शयनाधरपानादि नगराद्यवरोधनम्॥

स्नानानुलेपने चैभिर्वर्जितो नातिविस्तरः।

देवीपरिजनादीनाममात्यवणिजामपि।

प्रत्यक्षचित्रचरितैर्युक्तो भावरसोद्भवैः।

अन्तर्निष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्तितः॥

गर्भाङ्कलक्षणम्- अङ्कोदरप्रविष्टो यो रङ्गद्वारामुखादिमान्।

अङ्कोऽपरः स गर्भाङ्कः सबीजः फलवानपि॥

उदा- बालरामायणे रचितः सीतास्वयंवरो नाम गर्भाङ्कः।

पूर्वरङ्गलक्षणम् आह-

यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये।

कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते।

तस्य प्रधानावयवः अस्ति नान्दी। तल्लक्षणमाह-

आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते।

देवद्विजनृपादीनाम् तस्मान्नान्दीति संज्ञिता।

तत्र मङ्गलसूचकाः शङ्खादीनि पदानि भवन्ति। पदसंख्या द्वादश अष्ट वा भवन्ति।

सूत्रधारः पूर्वरङ्गं विधाय गते सति तद्वत् प्रविश्य स्थापकसूत्रधारः काव्यम् आस्थापयेत्।सः दिव्यं वस्तु दिव्यो भूत्वा मर्त्यं मर्त्यो भूत्वा मिश्रं च दिव्यमर्त्ययोः अन्यतरो भूत्वा सूचयेत्। तत्र वस्तुनः बीजस्य मुखस्य पात्रस्य वा सूचना दृश्यते। भारतीवृत्तिमाश्रितः स्थापकसूत्रधारः मधुरैः काव्यार्थसूचकैः श्लोकैः रङ्गं प्रसाध्य रूपकस्य कवेः नाम गोत्रादिः ऋतुं च कीर्तयेत्।

## वृत्तीनां निरूपणं-

भारती सात्वती कैशीकी आरभटी इति चतस्रः वृत्तयः सन्ति।

भारतीवृत्तेः लक्षणं-भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः।

तस्यां संस्कृतभाषायाः प्रयोगः अधिकतया दृश्यन्ते। तस्याः अङ्गचतुष्टयं। तेषां नाम लक्षणं च उच्यते।

भारतीवृत्तेरङ्गानि- १ प्ररोचना २ वीथी ३ प्रहसनं ४ आमुखं।

१ प्ररोचना- उन्मुखीकारः प्रशंसातः प्ररोचना।

प्रशंसातः प्रस्तुताभिनयेषु श्रोतृणाम् प्रवृत्युन्मुखीकरणं प्ररोचना।

यथा रत्नावल्यां-

श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी
लोके हारि च वत्सराजचरितं नाट्ये च दक्षा वयम्।
वस्त्वेकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-
र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः।

अत्र कवेः उपस्थितानां सहृदयानां इतिवृत्तस्य नटानां च महत्वमुक्त्वा सहृदयान् उन्मुखीकरोति।

२ आमुखं अथवा प्रस्तावना-

नटी विदूषको वापि पारिपार्श्विक एव वा।
सूत्रधारेण सहितः संलापं यत्र कुर्वते।
चित्रवाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा॥

यः कथा सूत्रम् धरति सः - सूत्रधारः।

यः अन्यैः सह काव्यं आस्थापयति सः - स्थापकसूत्रधारः।

सूत्रधारस्यानुचरः- पारिपार्श्विकः।

पारिपार्श्विकाद् किञ्चित् ऊनः - नटः।

प्रस्तावनाभेदाः-प्रस्तावनायाः उद्घात्यक ः कथोद्घातः प्रयोगातिशयः प्रवर्तकं अवलगितं इति पञ्चभेदाः विद्यन्ते।

१ उद्घात्यकः- पदानि त्वगतार्थानि तदर्थगतये नराः।
योजयन्ति पदैरन्यैः स उद्घात्यक उच्यते।

यथा मुद्राराक्षसे सूत्रधारः-

क्रूरग्रहः सकेतुश्चन्द्रमसम्पूर्णमण्डलमिदानीम्।
अभिभवितुमिच्छति बलात्-

इत्यनन्तरम्- नेपथ्ये-

आः क एष मयि जीवति चन्द्रगुप्तमभिभवितुमिच्छति इति।

उपरागसूचकानि पदानि चाणक्यः कोऽपि चन्द्रगुप्तं अभिभवितुं इच्छति इति अर्थे योजयति।

२ कथोद्घातः- सूत्रधारस्य वाक्यं वा समादायार्थमस्य वा

भवेत्पात्रप्रवेशश्चेत्कथोद्घातः स उच्यते।

यथा रत्नावल्यां- द्वीपादन्यस्मादपि- इत्यादि सूत्रधारेण पठिते- नेपथ्ये एवमेतत् कः सन्देहः द्वीपादन्यस्मादपि इत्यादि पठित्वा यौगन्धरायणस्य प्रवेशः।

३ प्रयोगातिशयः- यदि प्रयोग एकस्मिन् प्रयोगोऽन्यः प्रयुज्यते।

तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तदा॥

यथा कुन्दमालायाम्- नेपथ्ये इत इत इतोऽवतरत्वार्या।

सूत्रधारः कोऽयं खल्वार्याह्वानेन साहयकमपि मे सम्पादयति। विलोक्य कष्टमतिकरुणं वर्तते।

लङ्केश्वरस्य भवने सुचिरं स्थितेति
रामेण लोकपरिवादभयाकुलेन
निर्वासितां जनपदादपि गर्भगुर्वी
सीतां वनाय परिकर्षति लक्ष्मणोऽयम्॥

अत्र नृत्यप्रयोगार्थं स्वभार्याह्वानम् इच्छता सूत्रधारेण सीतां वनाय परिकर्षति लक्ष्मणोऽयम् इति सीतालक्ष्मणयोः प्रवेशं सूचयित्वा निष्क्रान्तेन स्वप्रयोगमतिशयान एव प्रयोगः प्रयुक्तः।

४ प्रवर्तकं - कालं प्रवृत्तमाश्रित्य सूत्रधृग्यत्र वर्णयेत्।

तदाश्रयश्च पात्रस्य प्रवेशस्तत्प्रवर्त्तकम्।

यथा- आसादितप्रकट- इत्यादि। ततः प्रविशति यथानिर्दिष्टो रामः।

५ अवलगितं- यत्रैकत्र समावेशात्कार्यमन्यत्प्रसाध्यते।

प्रयोगे खलु तज्ज्ञेयं नाम्नावलगितं बुधैः॥

यथा शाकुन्तले- सूत्रधारो नटीं प्रति।

तवास्मि गीतरागेण हारिणा प्रसभं हृतः
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा।

ततः राज्ञः प्रवेशः। अत्र उपमारूपेण नायकस्य परामर्शः ततः नायकप्रवेशश्च।

इतिवृत्तं-

इदमेव वस्तुरिति कीर्त्यते। तत् पुनः द्विविधं आधिकारिकं प्रासङ्गिकं च इति।

आधिकारिकं इतिवृत्तं- अधिकारः फले स्वाम्यमधिकारी च तत्प्रभुः।
तस्येतिवृत्तं कविभिराधिकारिकमुच्यते।

नायकस्य इतिवृत्तं आधिकारिकं। यथा बालरामायणे रामचरितम्।

प्रासङ्गिकं इतिवृत्तं- अस्योपकरणार्थं तु प्रासङ्गिकमितीष्यते।

आधिकारिकेतिवृत्तस्य उपकरणनिमित्तं यत् चरितं तत् प्रासङ्गिकम्। यथा सुग्रीवादिचरितम्।

पताकास्थानकलक्षणं तद्भेदाश्च-

सुविचार्य नाट्ये वस्तुनि पताकास्थानकं योज्यमिति उच्यते। तल्लक्षणमाह-

यत्रार्थे चिन्तितेऽन्यस्मिंस्तल्लिङ्गोऽन्यः प्रयुज्यते।
आगन्तुकेन भावेन पताकास्थानकं तु तत्॥

प्रथमं पताकास्थानकं- सहसैवार्थसंपत्तिर्गुणवत्युपचारतः।
पताकास्थानकमिदं प्रथमं परिकीर्त्तितम्।

यथा रत्नावल्याम्-

वासवदत्तेयम् इति राजा यदा तत्कण्ठपाशं मोचयति तदा तदुक्त्या सागरिकेयम् इति प्रत्यभिज्ञाय कथं प्रिया मे सागरिका।

अलमलमतिमात्रं साहसेनामुना ते
त्वरितमयि विमुञ्च त्वं लतापाशमेतम्।
चलितमपि निरोद्धुं जीवितं जीवितेशे
क्षणमिह मम कण्ठे बाहुपाशं विधेहि।

अत्र फलरूपार्थसंपत्तिः पूर्वापेक्षयोपचारातिशयाद् गुणवत्युत्कृष्टा।

द्वितीयं पताकास्थानकं- वचः सातिशयं श्लिष्टं नानाबन्धसमाश्रयम्।
पताकास्थानकमिदं द्वितीयं परिकीर्त्तितम्।

यथा वेणीसंहारे-

रक्तप्रसाधितभुवः क्षतविग्रहाश्च स्वस्था भवन्तु कुरुराजसुताः सभृत्याः।

अत्र रक्तादीनां रुधिरशरीरार्थहेतुकश्लेषवशेन बीजार्थप्रतिपादनात् नेतृमङ्गलप्रतिपत्तौ सत्यां द्वितीयं पताकास्थानकम्।

तृतीयं पताकास्थानकं- अर्थोपक्षेपकं यत्तु लीनं सविनयं भवेत्।

श्लिष्टप्रत्युत्तरोपेतं तृतीयमिदमुच्यते ।

यथा वेणीसंहारे-

कञ्चुकी- देव भग्नम् भग्नम्

राजा-केन

कञ्चुकी-भीमेन

राजा-कस्य

कञ्चुकी-भवतः

राजा- आः किं प्रलपसि ।

कञ्चुकी- देव ननु ब्रमीमि । भग्नं भीमेन भवतः ।

राजा-धिग् वृद्धापसद । कोऽयमद्य ते व्यामोह ।

कञ्चुकी-देव न व्यामोहः ।सत्यमेव-

भग्नं भीमेन भवतो मरुता रथकेतनम् ।

पतितं किङ्किणीकाणबद्धाक्रन्दमिव क्षितौ ॥

अत्र रथकेतनस्थाने उर्वोर्भङ्गः प्रतीतः ।

चतुर्थं पताकास्थानकम्- द्व्यर्थो वचनविन्यासः सुश्लिष्टः काव्ययोजितः ।

प्रधानार्थान्तरक्षेपी पाताकास्थानकं परम् ।

यथा रत्नावल्याम्-

उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणा-

दायासं श्वसनोद्गमैरविरलैरातन्वतीमात्मनः ।

अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं

पश्यन् कोपविपाटलद्युति मुखं देव्याः करिष्याम्ययम् ।

अत्र भावि अर्थः सूचितः ।

अर्थोपक्षेपकाः-

अङ्केषु अदर्शनीयाः वक्तव्या अभिमताः च दिनद्वयादारभ्य संवत्सपर्यन्तजा कथा अर्थोपक्षेपकैः सूचयेत् । दिनावसाने यत् कार्यं तदपि अर्थोपक्षेपकैः सूचयेत् । अर्थोपक्षेपकाः पञ्च संख्यकाः सन्ति । ते च- १ विष्कम्भः २ प्रवेशकः ३ चूलिका ४ अङ्कावतारः ५ अङ्कमुखं ।

१ विष्कम्भलक्षणं- वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।

संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ।

मध्येन मध्यमाभ्यां वा पात्राभ्यां संप्रयोजितः ।

शुद्धः स्यात्स तु संकीर्णो नीचमध्यमकल्पितः ।

शुद्धो यथा- मालतीमाधवे श्मशाने कपालकुण्डला।

सङ्कीर्णो यथा- रामाभिनन्दे क्षपणककापालिकौ।

२ प्रवेशकलक्षणं- प्रवेशकोऽनुदातोक्त्या नीचपात्रप्रयोजितः।

अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा।

एतत् प्राकृतभाषायां क्रियते। द्वयोः अङ्कयोः मध्ये तत्स्थितिः दृश्यते।

यथा- वेणीसंहारे अश्वत्थामाङ्के राक्षसमिथुनम्।

### विष्कम्भप्रवेशकयोः मिथः भेदः

| विष्कम्भः | प्रवेशकः |
|---|---|
| १ संस्कृतं प्राकृतं वा | प्राकृतमेव |
| २ अङ्कस्य आदौ | द्वयोः अङ्कयोः मध्ये |
| ३ मध्यपत्रैः नीचमध्यपात्रैः वा क्रियते | नीचपात्रैरेव क्रियते |
| ४ नाटकारम्भे दृश्यते | नाटकारम्भे कदापि न दृश्यते |

३ चूलिकालक्षणं- अन्तर्जवनिकासंस्थैः सूचनार्थस्य चूलिका।

यथा वीरचरिते चतुर्थाङ्कसादौ- नेपथ्ये भो भो वैमानिकाः प्रवर्तन्ताम् रङ्गमङ्गलानि इत्यादि। रामेण परशुरामो जितः इति नेपथ्ये पात्रैः सूचितम्।

अङ्कावतारलक्षणं- अङ्कान्ते सूचितः पात्रैस्तदङ्कस्याविभागतः।

यत्राङ्कोऽवतरत्येषोऽङ्कावतार इति स्मृतः।

यथा- शाकुन्तले पञ्चमाङ्के पात्रः सूचितः षष्ठाङ्कस्तदङ्कस्याङ्गविशेष इवावतीर्णः।

अङ्कमुखलक्षणं- यत्र स्यादङ्क एकस्मिन्नङ्कानां सूचनाखिला॥

तदङ्कमुखमित्याहुर्बीजार्थख्यापकं च तत्।

यथा- मालतीमाधवे प्रथमाङ्कादौ कामन्दक्यवलोकिते भूरिवसुप्रभृतीनां भाविभूमिकानां परिक्षिप्तकथाप्रबन्धस्य च प्रसङ्गात्सन्निवेशं सूचितवत्यौ।

अङ्कास्यलक्षणं- अङ्कान्तपात्रैर्वाङ्कास्यं छिन्नाङ्कस्यार्थसूचनात्।

यत्र अङ्गान्ते प्रविष्टैः पात्रैः अतीतस्य अङ्कस्य सूचना दीयते तत्र अङ्कास्यम्।

यथा वीरचरिते द्वितीयाङ्कान्ते-

सुमन्द्रः- भगवन्तो वशिष्ठविश्वामित्रौ भवतः सभार्गवानाह्वयतः।

इतरे- क्व भगवन्तौ

सुमन्त्रः- महाराजदशरथस्यान्तिके।

इतरे- तत्तत्रैव गच्छामः। इत्यङ्कपरिसमाप्तौ- ततः प्रविशत्युपविष्टः वशिष्ठविश्वामित्रपरशुरामा इत्यत्र पूर्वाङ्कान्त एव प्रविष्टेन सुमन्त्रपात्रेण शतानन्दजनककथाविच्छेदे उत्तराङ्कमुखसूचनादङ्कास्यम् इति।

अर्थप्रकृतयः- अर्थसिद्धिहेतवः पञ्च अर्थप्रकृतयः यथाविधिः नाटकेषु योज्याः। ताः १ बीजं २ बिन्दुः ३ पताका ४ प्रकरी ५ कार्यं च भवन्ति। तेषां स्वरूपमाह-

१ बीजलक्षणं- अल्पमात्रं समुद्दिष्टं बहुधा यद्विसर्पति।
फलस्य प्रथमो हेतुर्बीजं तदभिधीयते।

यथा- रत्नावल्यां वत्सराजस्य रत्नावलीप्राप्तिहेतुर्दैवानुकूल्यलालितो यौगन्धरायणव्यापारः।

२ बिन्दुलक्षणं- अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणं।

यथा- रत्नावल्यां अनङ्गपूजापरिसमाप्तौ काव्यार्थविच्छेदे सति उदयनस्येन्दोरिवोद्वीक्षते इति सागरिका श्रुत्वा कथं एष सो उदयन- इत्यादि।

३ पताकालक्षणं- व्यापि प्रासङ्गिकं वृत्तं पताकेत्यभिधीयते।

उपनायकादेः कथा पताका। यथा- रामचरिते सुग्रीवादेः।

४ प्रकरीलक्षणं- प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी मता।

अप्रधानपात्राणां क्षणिकं इतिवृत्तं प्रकरी।यथा कुलपत्यङ्के रावणजटायुसंवादः।

५ कार्यलक्षणं- अपेक्षितं तु यत्साध्यमारम्भो यन्निबन्धनः॥
समापनं तु यत्सिद्ध्यै तत्कार्यमिति संमतम्।

यदर्थम् काव्यनिबन्धनं तत् कार्यं।यथा- रामचरिते रावणवधः।

अवस्थापञ्चकं- अवस्था पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः।
आरम्भ-यत्न-प्राप्त्याशा-नियताप्ति-फलागमाः।

फलार्थिभिः प्रारब्धस्य कार्यस्य पञ्च अवस्था। ताः च- १ आरम्भः २ यत्नः ३ प्राप्त्याशा ४ नियताप्तिः ५ फलागमं च भवन्ति।

१ आरम्भलक्षणं- भवेदारम्भ औत्सुक्यं यन्मुख्यफलसिद्धये।

यथा- रत्नावल्यां रत्नावल्यन्तःपुरनिवेशार्थं यौगन्धरायणस्यौत्सुक्यं। एवं नायकनायिकादीनां अयौत्सुक्यमाकरेषु बोद्धव्यं।

२ प्रयत्नलक्षणं- प्रयत्नस्तु फलावाप्तौ व्यापारोऽतित्वरान्वितः।

यथा रामचरिते समुद्रबन्धनादिः।

३ प्राप्त्याशा- उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसंभवः।

यथा रत्नावल्यां तृतीयेऽङ्के वेषपरिवर्तनाभिसरणादेः सङ्गमोपायाद्वासवदत्तालक्षणापायशङ्कया चानिर्धारितैकान्तसङ्गमरूपफलप्राप्तिः प्राप्त्याशा।

४ नियताप्तिलक्षणं- अपायाभावतः प्राप्तिर्नियताप्तिस्तु निश्चिता।

यथा रत्नावल्यां- राजा- देवीप्रसादनं त्यक्त्वा नान्यमत्रोपायं पश्यामि। इति देवीलक्षणोपायस्य प्रसादनेन निवारणान्नियतफलप्राप्तिः सूचिता।

५ फलागमलक्षणं- सावस्था फलयोगः स्याद्यः समग्रफलोदयः।

यथा- रत्नावल्यां रत्नावलीलाभश्चक्रवर्तित्वलक्षणफलान्तरलाभसहितः।

इतिवृत्तस्य अवस्थानां च यथासंख्येन जातः योगः पञ्चसन्धयः।

# MODULE - II

सन्धिलक्षणं- अन्तैकार्थसंबन्धः सन्धिरेकान्वये सति।

एकेन प्रयोजनेन अन्वितानां कथांशानां अवान्तरैकप्रयोजनसम्बन्धः सन्धिः। तस्याः मुखं प्रतिमुखं गर्भः विमर्शः उपसंहृतिः इति भेदपञ्चकं विद्यते। एकैकस्य लक्षणमाह-

मुखं लक्षयति- यत्र बीजसमुत्पत्तिर्नानार्थरससंभवा।
प्रारम्भेण समायुक्ता तन्मुखं परिकीर्त्तितम्।

यत्र आरभेण समायुक्ता बीजसमुत्पत्तिः तत्र मुखं।

यथा- रत्नावल्यां प्रथमे अङ्के।

प्रतिमुखं लक्षयति- फलप्रधानोपायस्य मुखसन्धिनिवेशिनः।
लक्ष्यालक्ष्य इवोद्भेदो यत्र प्रतिमुखं च तत्।

यत्र मुखसन्धिनिरूपितस्य फलप्रधानोपायस्य लक्ष्यालक्ष्य इव उद्भेदः तत्र प्रतिमुखम्।

यथा रत्नावल्यां द्वितीये अङ्के उदयनसागरिकासमागमः एव फलं। तत्प्राप्तिहेतोः अनुरागबीजस्य सुसंगता विदूषकाभ्यां ज्ञायमानतया किंचिल्लक्ष्यस्य वासवदत्तया चित्रफलकवृत्तान्तेन किञ्चिदुन्नीयमानस्य प्रकाशनरूपः उद्भेदः।

गर्भं लक्षयति- फलप्रधानोपायस्य प्रागुद्भिन्नस्य किञ्चन।
गर्भो यत्र समुद्भेदो ह्रासान्वेषणवान्मुहुः।

फलस्य गर्भीकरणाद् गर्भ इति नाम। यथा रत्नावल्यां द्वितीयेऽङ्के -

सुसंगता- सखि अदक्षिणा इदानीम् असि त्वं या एवं भर्त्रा हस्तेन गृहीता अपि कोपं न मुञ्चसि। - इत्यादौ समुद्भेदः। पुनर्वासवदत्ताप्रवेशे ह्रासः।

तृतीये अङ्के -तद्वार्तान्वेषणाय गतः कथं चिरयति वसन्तकः- इति अन्वेषणम्। विदूषकः- ही ही भोः कौशाम्बीराज्यलाभेऽपि न तादृशः प्रियवयस्यस्य परितोषो यादृशो मम सकाशात् प्रियवचनं श्रुत्वा भविष्यति इत्यादौ उद्भेदः। पुनरपि वासवदत्ताप्रत्यभिज्ञानाद् ह्रासः। सागरिकायाः सङ्केतस्थानगमने अन्वेषणम्। पुनः लतापाशकरणे उद्भेदः।

विमर्शं लक्षयति- यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोऽधिकः।
शापाद्यैः सान्तरायश्च स विमर्श इति स्मृतः।

यत्र मुख्यफलोपायः शापाद्यैः सान्तरायः गर्भतः अधिकः उद्भिन्नः च लक्ष्यते तत्र विमर्शः।

यथा शाकुन्तले अनसूयाप्रियंवदासंभाषणाद् शकुन्तलायाः विवाहवृत्तान्तज्ञानादारभ्य दुर्वाससः शापपर्यान्ता कथा।

निर्वहणं लक्षयति- बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम्।
एकार्थमुपनीयन्ते यत्र निर्वहणं हि तत्॥

यत्र कथायां संयोजितानि अङ्गानि एकमेव प्रयोजनं उपनीयन्ते तत्र निर्वहणं।

उदा- वेणीसंहारे कञ्चुकी- महाराज ।वर्धसे। अयं खलु भीमसेनो दुर्योधनक्षतजारुणीकृतसर्वशरीरो दुर्लक्ष्यव्यक्तिः। इत्यादिना द्रौपदीकेशसंयमनादिमुखसन्ध्यादिबीजानां निजनिजस्थानोपक्षिप्तानामेकार्थयोजनम्।

✦✦✦✦✦

मुखसन्धेरङ्गानि-

उपक्षेपः परिकरः परिन्यासो विलोभनम्।
युक्तिः प्राप्तिः समाधानं विधानं परिभावना।
उद्भेदः करणं भेद एतान्यङ्गानि वै मुखे॥

अत्र एकैकस्यापि लक्षणमाह-

१ उपक्षेपः- काव्यार्थस्य समुत्पत्तिरुपक्षेप इति स्मृतः।

यथा वेणीसंहारे भीमः-

लाक्षागृहानलविषान्नसभाप्रवेशैः
प्राणेषु वित्तनिचयेषु च नः प्रहृत्य।
आकृष्य पाण्डववधूपरिधानकेशान्
स्वस्था भवन्ति मयि जीवति धार्तराष्ट्राः।

अत्र भीमसेनः कौरवकृतान् कर्मान् स्मृत्वा तदनन्तरं काक्वा मयि जीवति ते स्वस्थाः न भवन्ति इति सूचयति।

२ परिकरः- समुत्पन्नार्थबाहुल्यं ज्ञेयः परिकरः पुनः।

यथा वेणीसंहारे-

प्रवृद्धं यद्वैरं मम खलु शिशोरेव कुरुभि-
र्न तत्रार्यो हेतुर्न भवति किरीटी न च युवाम्।
जरासन्धस्योरःस्थलमिव विरूढं पुनरपि
क्रुधा भीमः सन्धिं विघटयति यूयं घटयत।

अत्र समुत्पन्नस्य वैररूपस्य अर्थस्य अतिशयसूचनात् परिकरो नाम सन्ध्यङ्गम्।

३ परिन्यासः- तन्निष्पत्तिः परिन्यासः।

काव्येतिवृत्तस्य संयक् उत्पत्तिः परिन्यासः।

यथा वेणीसंहारे-

चञ्चद्भुजभ्रमितचण्डगदाभिघातसंचूर्णितोरुयुगलस्य सुयोधनस्य।
स्त्यानावनद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि भीमः।

दुर्योधनरुधिरेण केशसंहार एव अत्र इतिवृत्तमिति स्पष्टीकृतम्।

यदा उपक्षेपः इतिवृत्तलक्षणस्य काव्याभिधेयस्य संक्षेपेण उपक्षेपणं तदा परिकरः तस्य एव बहुलीमरणम्। परिन्यासः ततः अपि निश्चयापत्तीरूपतया परितः हृदये न्यसनम्।

४ विलोभनम् -गुणाख्यानं विलोभनम्

यथा वेणीसंहारे द्रौपदी- नाथ किं दुष्करं त्वया परिकुपितेन।

अत्र भीमसेनस्य शौर्यकीर्त्तनेन दुर्योधनादिवधे लोभजननाद् विलोभनम्।

५ युक्तिः - संप्रधारणमर्थानां युक्तिः

कर्त्तव्यविषयाणां निश्चयः युक्तिः।

यथा वेणीसंहारे- सहदेवः भीमं प्रति - आर्य किं महाराजसन्देशोऽयमव्युत्पन्न एवार्येण गृहीतः इत्यतः प्रभृति यावद् भीमवचनम्।

युष्मान् ह्रेपयति क्रोधाल्लोके शत्रुकुलक्षयः।
न लज्जयति दाराणां सभायां केशकर्षणम्। इति।

६ प्राप्तिः - प्राप्तिः सुखागमः।

यथा वेणीसंहारे- मथ्नामि कौरवशतं समरे न कोपात्। इत्यादि श्रुत्वा
द्रौपदी- नाथ अश्रुतपूर्वं खलु इदं वचनम्। तत्पुनः पुनर्भण।

७ समाधानं-बीजस्यागमनं यत्तु तत्समाधानमुच्यते।

यथा वेणीसंहारे- भो भो विराटद्रुपदप्रभृतयः श्रूयताम्।

यत्सत्यव्रतभङ्गभीरुमनसा यत्नेन मन्दीकृत
यद्विस्मर्तुमपीहितं शमवता शान्तिं कुलस्येच्छता।
तद्द्यूतारणिसंभृतं नृपसुताकेशाम्बराकर्षणैः
क्रोधज्योतिरिदं महत्कुरुवने यौधिष्ठिरं जृम्भते।

अत्र बीजस्य आगमनं स्पष्टतया सूचितम्।

८ विधानं- सुखदुःखकृतो योऽर्थस्तद्विधानमिति स्मृतम्।

यथा बालचरिते-

उत्साहातिशयं वत्स तव बाल्यं च पश्यतः।
मम हर्षविषादाभ्यामाक्रान्तं युगपन्मनः।

९ परिभावना- कुतूहलोत्तरा वाचः प्रोक्ता तु परिभावना।

यथा वेणीसंहारे- द्रौपदी युद्धं स्यान्न वेति संशयाना तूर्यशब्दानन्तरम्- नाथ किं इदानीमेष प्रलयजलधरस्तनितमन्थरः क्षणे क्षणे समरदुन्दुभिस्ताडयते।

१० उद्भेदः- बीजार्थस्य प्ररोहः स्यादुद्भेदः।

यथा वेणीसंहारे- द्रौपदी- नाथ पुनरपि त्वया समाश्वासयितव्या।

भीमः-

भूयः परिभवक्लान्तिलज्जाविधुरिताननम्।

अनिःशेषितकौरव्यं न पश्यसि वृकोदरम्।

११ करणं- करणं पुनः प्रकृतार्थसमारंभः।

यथा वेणीसंहारे- देवि। गच्छामो वयमिदानीं कुरुकुलक्षयाय इति।

१२ भेदः- भेदः संहतभेदनम्।

यथा वेणीसंहारे- अत एव अद्य प्रभृति भिन्नोऽहं भवद्भ्यः।

✦✦✦✦✦

प्रतिमुखाङ्गानि-

विलासः परिसर्पश्च विधुतं तापनं तथा॥

नर्म नर्मद्युतिश्चैव तथा प्रगमनं पुनः।

विरोधश्च प्रतिमुखे तथा स्यात्पर्युपासनम्।

पुष्पं वज्रमुपन्यासो वर्णसंहार इत्यपि।

१ विलासः - समीहा रतिभोगार्था विलास इति कथ्यते।

रतिलक्षणस्य भावस्य यः हेतुभूतः भोगः विषयः प्रमदा पुरुषः वा तदर्था समीहा विलासः। यथा शाकुन्तले-

कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनायासि।

अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते।

२ परिसर्पः-इष्टनष्टानुसरणं परिसर्पश्च कथ्यते।

यथा शाकुन्तले- राजा- भवितव्यमत्र तया। तथा हि

अभ्युन्नता पुरस्तादवगाढा जघनगौरवात्पश्चात्।

द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा।

३ विधुतं- कृतस्यानुनयस्यादौ विधुतं त्वपरिग्रहः।

यथा वेणीसंहारे- अलं वोः अन्तःपुरविरहपर्युत्सुकेन राजर्षिणा उपरुद्धेन।

४ तापनं- उपायादर्शनं यत्तु तापनं नाम तद्भवेत्।

यथा रत्नावल्याम् - सागरिका-

दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा।

प्रियसखि विषमं प्रेम मरणं शरणं केवलमेकम्।

अत्र उपायादर्शनात् मरणमेव अश्रयमिति वदति नायिका।

५ नर्म- परिहासवचो नर्म।

यथा रत्नावल्यां- सुसंगता- सखि यस्य कृते त्वमागता सोऽद्य ते पुरतस्तिष्ठति।

सागरिका- कस्य कृते अहमागता।

सुसंगता -अलमन्यशङ्कितेन ननु चित्रफलकस्य।

६ नर्मद्युतिः- द्युतिस्तु परिहासजा नर्मद्युतिः।

यथा रत्नावल्यां- सुसंगता- सखि अदक्षिणेदानीं असि त्वं या एवं भर्त्रा हस्तावलंबितापि कोपं न मुञ्चसि।

सागरिका- सुसंगते इदानीमपि क्रीडितुं न विरमसि।

७ प्रगमनं - प्रगमनं वाक्यं स्यादुत्तरोत्तरं।

यथा विक्रमोर्वशीये-

उर्वशी- जयतु जयतु महाराज।

राजा- मया नाम जितं यस्य त्वया जय उदीर्यते। इत्यादि।

९ विरोधः- विरोधो व्यसनप्राप्तिः।

यथा चण्डकौशिके- राजा- नूनम् असमीक्ष्यकारिणा मया अन्धेनेव स्फुरच्छिखाकलापो ज्वलनः पद्भ्यां समाक्रान्तः।

१० पर्युपासनं- कृतस्यानुनयः पुनः स्यात्पर्युपासनं।

यथा रत्नावल्यां-

विदूषकः- भो मा कुप्य। एषा हि कदलीगृहाभ्यन्तरं गता।

११ पुष्पं- पुष्पं विशेषवचनं मतम्।

यथा रत्नावल्यां- राजा हस्ते गृहीत्वा स्पर्शं नाटयति।

विदूषकः- भोः वयस्य एषा अपूर्वा श्रीस्त्वया समासादिता

राजा- वयस्य  सत्यं

श्रीरेषा पाणिरप्यस्याः पारिजातस्य पल्लवः।
कुतोऽन्यथा स्रवत्येष स्वेदच्छद्मामृतद्रवः।

१२ वज्रं- प्रत्यक्षनिष्ठुरं वज्रम्।

यथा रत्नावल्यां

राजा- कथमिहस्थोऽहं त्वया ज्ञातः।

सुसंगता- न केवलं समं चित्रफलकेन। तद्यावद् गत्वा देव्यै निवेदयिष्यामि।

१३ उपन्यासः- उपन्यासः प्रसादनम्।

यथा रत्नावल्यां-

सुसंगता- भर्तः। अलं शङ्कया। मयाऽपि भर्त्र्याः प्रसादेन क्रीडितमेव एतैः। तत्किं कर्णाभरणेन। अतोऽपि मे गुरुतरः प्रसाद एषः यत्वया अहमत्र आलिखितेति कुपिता मे प्रियसखी सागरिका। एषैव प्रसाद्यताम्।

१४ वर्णसंहारः- चातुर्वर्ण्योपगमनं वर्णसंहार इष्यते।

यथा महावीरचरिते-

परिषदियमृषीणामेष वीरो युधाजित् सह नृपतिरमात्यैर्लोमपादश्च वृद्धः।

अयमविरतयज्ञो ब्रह्मवादी पुराणः प्रभुरपि जनकानामङ्ग। भो याचकस्ते।

अत्र मुनीनां क्षत्रियाणां च मेलनम्।

✦✦✦✦✦

गर्भसन्धेरङ्गानि-

अभूताहरणं मार्गो रूपोदाहरणे क्रमः।

संग्रहश्चानुमानं च प्रार्थना क्षिप्तिरेव च।

तोटकाधिबलोद्वेगागर्भेस्युर्विद्रवस्तथा।

१ अभूताहरणं- व्याजाश्रयं वाक्यं अभूताहरणं मतम्।

यथा अश्वत्थामाङ्के-

अश्वत्थामा हत इति पृथासूनुना स्पष्टमुक्त्वा

स्वैरं शेषे गज इति पुनर्व्याहृतं सत्यवाचा।

तच्छ्रुत्वाऽसौ दयिततनयः प्रत्यात्तस्य राज्ञः

शस्त्राण्याजौ नयनसलिलं चापि तुल्यं मुमोच।

२ मार्गः- तत्त्वार्थकथनं मार्गः।

यथा चण्डकौशिके- राजा- भगवन्

गृह्यतामार्जितमिदं भार्यातनयविक्रयात्।

शेषस्यार्थे करिष्यामि चण्डालेऽप्यात्मविक्रयम्।

३ रूपं- रूपं वाक्यं वितर्कवत्।

यथा रत्नावल्याम्-राजा-

मनः प्रकृत्यैव चलं दुर्लक्ष्यं च तथापि मे।

कामेनैतत्कथं विद्धं समं सर्वैः शिलीमुखैः।

४ उदाहरणं- उदाहरणमुत्कर्षयुक्तं वचनमुच्यते।

यथा अश्वत्थामाङ्के-

योऽयः शस्त्रं बिभर्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां

योः यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा।

यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः

क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम्।

५ क्रमः- भावतत्वोपलब्धिस्तु क्रमः स्यात्।

यथा शाकुन्तले- राजा- स्थाने खलु विस्मृतनिमेषेण चक्षुषा प्रियामवलोकयामि। तथाहि-

उन्नमितैकभ्रूलतमाननमस्याः पदानि रचयन्त्याः।

पुलकाञ्चितेन कथयति मय्यनुरागं कपोलेन।

६ संग्रहः- संग्रहः पुनः सामदानार्थसंपन्नः।

यथा रत्नावल्यां- राजा- साधु वयस्य। इदं ते पारितोषिकम्। इति कटकं ददाति।

७ अनुमानं- लिङ्गादूहोऽनुमानता।

यथा जानकीराघवे - रामः-

लीलागतैरपि तरङ्गयतो धरित्रीमालोकनैर्नमयतो जगतां शिरांसि।

तस्यानुमापयति काञ्चनकान्तिगौरकायस्य सूर्यतनयत्वमधृष्यतां च।

८ प्रार्थना- रतिर्हर्षोत्सवानां तु प्रार्थना भवेत्।

यथा रत्नावल्याम्-राजा-प्रिये सागरिके

शीतांशुर्मुखमुत्पले तव दृशौ पद्मानुकारौ करौ

रम्भास्तम्भनिभं तथोरुयुगलं बाहू मृणालोपमौ।

इत्याह्लादकराखिलाङ्गि रभसान्निःशङ्कमालिङ्ग्य मा-

मङ्गानि त्वमनङ्गतापविधुराण्येह्येहि निर्वापय।

९ क्षिप्तिः- रहस्यार्थस्य तूद्भेदः क्षिप्तिः स्यात्।

यथा अश्वत्थामाङ्के

एकस्यैव विपाकोऽयं दारुणो भुवि वर्तते।

केशग्रहे द्वितीयेऽस्मिन्नूनं निःशेषिताः प्रजाः।

१० तोटकं -तोटकं पुनः संरब्धवाक्।

यथा चण्डकौशिके- कौशिकः- आः पुनः कथमद्यापि न संभूताः स्वर्णदक्षिणाः।

११ अधिबलं- अधिबलमभिसंधिश्छलेन यः।

यथा रत्नावल्याम्-

काञ्चनमाला- भट्टिनि इयं सा चित्रशालिका।वसन्तकस्य संज्ञां करोमि।

१२ उद्वेगः- नृपादिजनिता भीतिरुद्वेगः परिकीर्तितः।

यथा वेणीसंहारे-

प्राप्तावेकरथारूढौ पृच्छन्तौ त्वामितस्ततः।

स कर्णारिः स च क्रूरो वृककर्मा वृकोदरः।

१३ विद्रवः- शङ्काभयत्रासकृतः संभ्रमो विद्रवो मतः।

कालान्तककरालास्यं क्रोधोद्भूतं दशाननम्।

विलोक्य वानरानीके संभ्रमः कोऽप्यजायत।

✦✦✦✦✦

विमर्शाङ्गानि- अपवादोऽथ संफेटो व्यवसायो द्रवो द्युतिः।

शक्तिः प्रसङ्गः खेदश्च प्रतिषेधो विरोधनम्।

प्ररोचना विमर्शे स्यादादानं छादनं तथा॥

१ अपवादः- दोषप्रख्यापवादः स्यात्।

यथा वेणीसंहारे-

युधिष्ठिरः- पाञ्चालक क्वचिदासादिता तस्य दुरात्मनः कौरव्यापसदस्य पदवी।

पाञ्चालकः- न केवलं पदवी स एव दुरात्मा देवीकेशपाशस्पर्शपातकप्रधानहेतुरुपलब्धः।

२ संफेटः- संफेटो रोषभाषणम्।

यथा वेणीसंहारे- दुर्योधनः- अरे रे मरुत्तनय वृद्धस्य राज्ञः पुरतो निन्दितमप्यात्मकर्म श्लाघसे। शृणुरे।

कृष्टा केशेषु भार्या तव तव च पशोस्तव राज्ञस्तयोर्वा

प्रत्यक्षं भूपतीनां मम भुवनपतेराज्ञया द्यूतदासी।

तस्मिन् वैरानुबन्धे वद किमपकृतं तैर्हता ये नरेन्द्राः

बाह्वोर्वीर्यातिभारद्रविणगुरुमदं मामजित्वैव दर्पः।

भीमः- आः पाप इत्यादि।

३ व्यवसायः- व्यवसायश्च विज्ञेयः प्रतिज्ञाहेतुसंभवः।

यथा वेणीसंहारे-

भीमः - निहताशेषकौरव्यः क्षीबो दुःशासनासृजाः।

भङ्क्ता दुर्योधनस्योर्वोर्भीमोऽयं शिरसा नतः॥

४ द्रवः- द्रवो गुरुव्यतिक्रान्तिः शोकावेगादिसंभवा।

यथा वेणीसंहारे- युधिष्ठिरः- भगवन् कृष्णाग्रज सुभद्राभ्रातः

ज्ञातिप्रीतिर्मनसिनकृता क्षत्रियाणां न धर्मो

रूढं सख्यम् तदपि गणितं नानुजस्यार्जुनेन।

तुल्यः कामं भवतु भवतः शिष्ययोः स्नेहबन्धः

कोऽयं पन्था यदसि विमुखो मन्दभाग्ये मयि त्वम्।

५ द्युतिः- तर्जनोद्वेजने प्रोक्ता द्युतिः।

यथा वेणीसंहारे दुर्योधनं प्रति भीमः-

जन्मेन्दोर्विमले कुले व्यपदिशस्यद्यापि धत्से गदां

मां दुःशासनकोष्णशोणितमधुक्षीबं रिपुं मन्यसे।

दर्पान्धा मघुकैटभद्विषि हारावप्युद्धतं चेष्टसे

त्रासान्मे नृपशो विहाय समरं पङ्केऽधुना लीयसे।

६ शक्तिः- शक्तिः पुनर्भवेत् विरोधस्य प्रशमनम्।

यथा वेणीसंहारे-

कुर्वन्त्वाप्ता हतानां रणशिरसि जना भस्मसाद् देहभारा-

नश्रून्मिश्रं कथञ्चिद्ददतु जलममी बान्धवा बान्धवेभ्यः।

मार्गन्तां ज्ञातिदेहान् हतनरगहने खण्डितान् गृध्रकङ्के-

रस्तं भास्वान् प्रयातः सह रिपुभिरयं संह्रियन्तां बलानि॥

७ प्रसङ्गः- प्रसङ्गो गुरुकीर्त्तनम्।

यथा मृच्छकटिके-

चाण्डालकः- एष खलु सागरदत्तस्य सुत आर्यविश्वदत्तस्य नप्ता चारुदतो व्यापादयितुं वध्यस्थानं नीयते। एतेन किल गणिका वसन्तसेना सुवर्णलोभेन व्यापादिता। चारुदत्तः-

मखशतपरिपूतं गोत्रमुद्भासितं यत्

सदसिनिबिडचैत्यब्रह्मघोषैः पुरस्तात्।

मम निधनदशायां वर्त्तमानस्य पापै-

स्तदसदृशमनुष्यैर्घुष्यते घोषणायाम्।

८ खेदः- मनश्चेष्टासमुत्पन्न श्रम खेद इति स्मृतः।

यथा मालतीमाधवे-

दलति हृदयं गाढोद्वेगो द्विधा न तु भिद्यते

वहति विकलः कायो मोहं न मुञ्चति चेतनाम्।

ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्

प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम्।

९ प्रतिषेधः- ईप्सितार्थप्रतीघातः प्रतिषेध इतीर्यते।

यथा प्रभावत्यां विदूषकं प्रति -

प्रद्युम्नः- सखे कथमिह त्वमेकाकी वर्त्तसे। क्व नु पुनः प्रियसखीजनानुगम्यमाना प्रियतमा मे प्रभावती।

विदूषकः- असुरपतिना आकायं कुत्राऽपि नीता।

प्रद्युम्नः- दीर्घं निःश्वस्य

हा पूर्णचन्द्रमुखि मत्तचकोरनेत्रे

मामानताङ्गि परिहाय कुतो गतासि गच्छ त्वमद्य

ननु जीवित तूर्णमेव दैवं कदर्थनपरं कृतकृत्यमस्तु॥

१० विरोधनं- कार्यात्ययोपगमनं विरोधनमितिस्मृतम्।

विघ्नप्राप्तिरेव विरोधनम्। यथा वेणीसंहारे-

युधिष्ठिरः- तीर्णे भीष्ममहोदधौ कथमपि द्रोणानले निर्वृते

कर्णाशीविषभोगिनि प्रशमिते शल्ये च याते दिवम्।

भीमेन प्रियसाहासेन रभसादल्पावशेषे जये

सर्वे जीवितसंशयं वयममि वाचा समारोपिताः।

११ प्ररोचना - प्ररोचना तु विज्ञेया संहारार्थप्रदर्शिनी।

यथा वेणीसंहारे- पाञ्चालकः अहं देवेन चक्रपाणिना सहितः इत्युपक्रम्य।

पूर्यन्तां सलिलेन रत्नकलशा राज्याभिषेकाय ते

कृष्णात्यन्तचिरोज्झिते तु कबरीबन्धे करोतु क्षणम्।

रामे शातकुठारभास्वरकरे क्षत्रद्रुमोच्छेदिनि

क्रोधान्धे च वृदोकरे परिपतत्याजौ कुतः संशयः॥

१२ आदानं- कार्यसंग्रह आदानम्।

यथा वेणीसंहारे- भोः भोः समन्तपञ्चकचारिणः।

नाहं रक्षो न भूतो रिपुरुधिरजलाह्लादिताङ्गः प्रकामं

निस्तीर्णोरुप्रतिज्ञाजलनिधिगहनः क्रोधनः क्षत्रियोऽस्मि।

भो भो राजन्यवीराः समरशिखिशिखाभुक्तशेषाः कृतम् व-

स्त्रसेनानेन लीनैर्हतकरितुरगान्तर्हितैरास्यते यत्॥

अत्र समस्तरिपुवधकार्यस्य संगृहीतत्वात् आदानम्।

१३ छादनं- तदाहुश्छादनं पुनः कार्यार्थमपमानादेः सहनं खलु यद्भवेत्॥

यथा वेणीसंहारे- अर्जुनः- आर्य प्रसीद

अप्रियाणि करोत्येष वाचा शक्तो न कर्मणा।

हतभ्रातृशतो दुःखी प्रलापैरस्य का व्यथा॥

✦✦✦✦✦

निर्वहणाङ्गानि -

सन्धिर्विबोधो ग्रथनं निर्णयः परिभाषणम्।

कृतिः प्रसाद आनन्दः समयोऽप्युपगूहनम्।

भाषणं पूर्ववाक्यश्च काव्यसंहार एव च।

प्रशस्तिरिति संहारे ज्ञेयान्यङ्गानि नामतः।

१ सन्धिः-बीजोपगमनं सन्धिः।

यथा वेणीसंहारे-

भीमः- भवति यज्ञवेदिसंभवे स्मरति भवती यन्मयोक्तम्। चञ्चद्भुजे- इत्यादि। अनेन मुखे क्षिप्तबीजस्य पुनरुपगमनमिति सन्धिः।

२ विबोधः- विबोधः कार्यमार्गणम्।

यथा वेणीसंहारे- भीमः - मुञ्चतु नामार्यः क्षणमेकम्।

युधिष्ठिरः- किमपरमवशिष्टम्।

भीमः- सुमहदवशिष्टम्। समापयामि तावदनेन सुयोधनशोणितोक्षितेन पाणिना पाञ्चाल्या दुःशासनावकृष्टं केशहस्तम्।

युधिष्ठिरः- गच्छतु भवान् अनुभवतु तपस्विनी वेणीसंहारम् इति। अनेन केशसंयमनकार्यस्यान्वेषणाद् विबोधः।

३ उपन्यासः- उपन्यासस्तु कार्याणां ग्रथनम्।

यथा वेणीसंहारे- भीमः- पाञ्चालि न खलु मयि जीवति संहर्त्तव्या दुःशासनविलुलितवेणिरात्मपाणिभ्याम्। तिष्ठ स्वयमेवहं संहरामि। इति।

अनेन कार्यस्योपक्षेपाद् ग्रथनम्।

४ निर्णयः- निर्णयः पुनः अनुभूतार्थकथनं।

यथा वेणीसंहारे- भीमः- देव अजातशत्रो अद्यापि दुर्योधनहतकः। मया हि तस्य दुरात्मनः-

भूमौ क्षिप्तं शरीरं निहितमिदमसृक्चन्दनाभं निजाङ्गे
लक्ष्मीरार्ये निषिक्ता चतुरुदधिपयःसीमया सार्द्धमुर्व्या।
भृत्या मित्राणि योद्धाः कुरुकुलमनुजा दग्धमेतद्रणाग्नौ
नामैकं यद् ब्रवीषि क्षितिप तदधुना धार्त्तराष्ट्रस्य शेषम्।

४ परिभाषणम्- वदन्ति परिभाषणं परिवादकृतं वाक्यम्।

यथा शाकुन्तले- राजा- आर्ये अथ सा तत्र भवती किमाख्यस्य राजर्षेः पत्नी।

तापसी- को तस्य धर्मदारपरित्यागिनः नाम ग्रहिष्यति।

५ कृतिः- लब्धार्थशमनं कृतिः।

यथा वेणीसंहारे- कृष्णः- एते भगवन्तो व्यासवाल्मीकिप्रभृतयोऽभिषेकं धारयन्तः तिष्ठन्ति इति।

अनेन प्राप्तराज्याभिषेकमङ्गलस्थिरीकरणं कृतिः।

६ प्रसादः- शुश्रूषादिः प्रसादः स्यात्।

यथा वेणीसंहारे भीमेन द्रौपद्याः केशसंयमनम्।

७ आनन्दः- आनन्दो वाञ्छितागमः।

यथा वेणीसंहारे- द्रौपदी - विस्मृतमेनं व्यापारं नाथस्य प्रसादेन पुनरपि शिक्षिष्ये।

८ समयः- समयो दुःखनिर्याणं।

यथा रत्नावल्यां वासवदत्त- रत्नावलीमालिङ्ग्य - समाश्वसितु भगिनी समाश्वसितु।

९ उपगूहनं- तद्भवेदुपगूहनं यत् स्यादद्भुतसम्प्राप्तिः।

यथा मम प्रभावत्यां नारददर्शनात् प्रद्युमन् उर्ध्वमवलोक्य-

दधद्विद्युल्लेखामिव कुसुममालां परिमल-
भ्रमद्भृङ्गश्रेणीध्वनिभिरुपगीतां तत् इतः।
दिगन्तं ज्योतिर्भिस्तुहिनकरगौरैर्धवलय-
न्नितः कैलासाद्रिः पतित वियतः किं पुनरिदम्॥

१० भाषणं- सामदानादि भाषणम्।

यथा चण्डकौशिके- धर्मः- तदेहि धर्मलोकमधितिष्ठ।

११ पूर्ववाक्यं- पूर्ववाक्यं तु विज्ञेयं यथोक्तार्थोपदर्शनम्।

यथा वेण्याम्- भीमः- बुद्धिमतिके क्व सा भानुमती परिभवतु सम्प्रति पाण्डवदारान्।

१२ काव्यसंहारः- वरप्रदानसंप्राप्तिः काव्यसंहार इष्यते।

यथा सर्वत्र किं ते भूयः प्रियमुपकरोमि। इति।

१३ प्रशस्तिः- नृपदेशादिशान्तिस्तु प्रशस्तिरभिधीयते।

यथा प्रभावत्याम् -

राजानः सुतनिर्विशेषमधुना पश्यन्तु नित्यं प्रजा
जीयासुः सदसद्विवेकपटवः सन्तो गुणग्राहिणः।
सस्यवर्णसमृद्धयः समधिकाः सन्तु क्षमामण्डले
भूयादव्यभिचारिणी त्रिजगतो भक्तिश्च नारायणे।

✦✦✦✦✦

सन्ध्यङ्गानां षड्विधं फलम्-

१ इष्टार्थरचना

२ अश्चर्यलाभः

३ वृत्तान्तविस्तरः

४ प्रयोगस्य रागप्राप्तिः

६ गोप्यानां गोपनम्

७ प्रकाश्यानां प्रकाशनं च भवन्ति सन्ध्यङ्गानां प्रयोजनानि।

अङ्गहीनः पुरुषः यथा स्वकर्मानुष्ठाने असमर्थ जायते तथैव अङ्गहीनं काव्यं न प्रोयोगाय युज्यते। सन्ध्यङ्गानां सन्निवेशः रसाश्रयः एव कार्यः।

✦✦✦✦✦

## वृत्तीनां निरूपणं-

नायिकादिव्यापारविशेषाः एव वृत्तयः।ताश्च भारती कैशिकी सात्त्वती आरभटी इति चतस्रः भवन्ति। ताः सकलाभिनयस्य मातृवदुपजीव्याः। वृत्तीनां रसानां च सम्बन्धः एवमस्ति -

| | | |
|---|---|---|
| शृङ्गारः | - | कैशिकी |
| वीरः | - | सात्त्वती |
| रौद्रः बीभत्सः | - | आरभटी |
| सर्वेषु रसेषु | - | भारती |

1-कैशिकीलक्षणं-

या श्लक्ष्णनेपथ्यविशेषचित्रा स्त्रीसंकुला पुष्कलनृत्त्यगीता
कामोपभोगप्रभवोपचारा सा कैशिकी चारुविलासयुक्ता।

कैशिकीविशेषाः-

१ भूषणादीनां अतिविचित्रः मनोहरश्च सञ्चयः।

२ बह्व्यः स्त्रियः भवन्ति।

३ नृत्तगीतानां सान्निध्यः।

४ शृङ्गाररसस्य सान्निध्यः।

नर्म नर्मस्फूर्जः नर्मस्फोटः नर्मगर्भः इति अस्याः चत्वारि अङ्गानि भवन्ति।

नर्म- वैदग्ध्यक्रीडितं नर्म।

इष्टजनावर्जनकृत्तच्चापि त्रिविधम् मतं।

विहितम् शुद्धहास्येन सशृङ्गारभयेन च

यथा रत्नावल्यां - वासवदत्ता- एषापि अपरा तव समीपे यथा लिखिता इदं किमार्यवसन्तकस्य विज्ञातम्।

नर्मस्फूर्जः- नर्मस्फूर्जः सुखारम्भो भयन्तो नवसंगमः।

यथा मालविकाग्निमित्रे .

नायकः- विसृज सुन्दरि सङ्गमसाध्वसं ननु चिरात्प्रभृति प्रणयोन्मुखे।

परिगृहाण गते सहकारताम् त्वमतिमुक्तालताचरितं मयि।

मालविका- भर्तः देव्याः भयेन आत्मनोऽपि प्रियं कर्तुं न पारयामि।

नर्मस्फोटः- नर्मस्फोटो भावलेशैः सूचितोल्परसोमतः।

यथा मालतीमाधवे

गमनमलसं शून्या दृष्टिः शरीरमसौष्ठवं

श्वसितमधिकं किन्वेतत् स्यात् किमन्यदितोऽथवा।

भ्रमति भुवने कन्दर्पाज्ञा विकारि च यौवनं

ललितमधुरास्ते ते भावाः क्षिपन्ति च धीरताम्।

अत्र अलसगमनादिभिः भावलेशैः माधवस्य मालत्याम् अनुरागः स्तोकः प्रकाशितः।

नर्मगर्भः -नर्मगर्भो व्यवहृतिर्नेतुः प्रच्छन्नवर्तिनः।

यथा मालतीमाधवे सखीरूपधारिणा माधवेन मालत्या मरणव्यवसायवारणं।

2-सात्त्वतीवृत्तिः- सात्त्वती बहुला सत्त्वशौर्यत्यागदयार्जवैः।

सहर्षा क्षुद्रशृङ्गारा विशोका साद्भुता तथा।

सात्त्वतीविशेषाः -

१ शृङ्गाररसेन हीना

२ विगतशोका

३ अद्भुतरसेनयुक्ता

४ सहर्षा

तस्याः उत्थापकः संघात्यः संलापः परिवर्त्तकः इति चत्त्वारः विशेषाः स्युः।

उत्थापकः- उत्तेजनकरी शत्रोर्वागुत्थापक उच्यते।

यथा महावीरचरिते-

आनन्दाय च विस्मयाय च मया दृष्टोऽसि दुःखाय वा

वैतृष्ण्यन्तु ममापि सम्प्रति कुतस्त्वद्दर्शने चक्षुषः।

त्वत्साङ्गत्यसुखस्य नाऽस्मि विषयस्तत् किं वृथा व्याहृतैः।

अस्मिन् विश्रुतजामदग्न्यदमने पाणौ धनुर्जृम्भताम्।

संघात्यः - मन्त्रार्थदैवशक्त्यादेः संघात्यः सङ्घभेदनम्।

यथा रामायणे दैवशक्त्या रावणाद् विभीषणस्य भेदः।

संलापः- संलापः स्याद् गभीरोक्तिर्नानाभावसमाश्रयः।

यथा वीरचरिते रामः- अयं सः यः किल सपरिवारकार्त्तिकेयविजयावर्जितेन भगवता नीललोहितेन परिवत्सरसहस्रान्तेवासिने तुभ्यं प्रसादीकृतः परशुः।

परशुरामः- राम दाशरथे स एवायमाप्र्पादानां प्रियः परशुः।

परिवर्तकः -प्रारब्धादन्यकार्याणां कारणं परिवर्तकः।

यथा वेणीसंहारे-

भीमः- सहदेव गच्छ त्वं गुरुमनुवर्तस्व। अहमप्यस्त्रागारं प्रविश्यायुधसहायो भवामीति यातत्। अथवा आमन्त्रयितव्यैव मया पाञ्चाली इति।

3-आरभटीवृत्तिः- मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः।

संयुक्ता वधबन्धाद्यैरुद्धतारभटी मता।

तस्या च वस्तूत्थापनं संफेटः संक्षिप्तिः अवपातनम् इति चत्वारः भेदाः सन्ति।

तत्र वस्तूत्थापनं- मायाद्युत्थापितं वस्तु वस्तूत्थापनमुच्यते।

यथा उदात्तराघवे-

जीयन्ते जयिनोऽपि सान्द्रतिमिरव्रातैर्वियद् व्यापिभि-
र्भास्वन्तः सकला रवेरपि कराः कस्मादकस्मादमी।
एते चोग्रकबन्धकण्ठरुधिरैराध्मायमानोदरा
मुञ्चन्त्याननकन्दरानलमुचस्तीव्रान् रवान् फेरवाः।

संफेटः- संफेटस्तु समाघातः क्रुद्धसत्वरयोः।

यथा मालतीमाधवे माधवाघोरघण्टयोः।

संक्षिप्तिः- संक्षिप्तिवस्तुरचना शिल्पैरितरथापि वा।
संक्षिप्तिः स्यान्निवृत्तौ च नेतुर्नेत्रन्तरग्रहः।

यथा उदयनचरिते कलिञ्जहस्तिप्रयोगः। द्वितीयं यथा बालिनिवृत्त्या सुग्रीवः।

अवपातनं-प्रवेशत्रासनिष्क्रान्तिर्हर्षविद्रवसंभवं अवपातनमित्युक्तम्।

यथा कृत्यरावणे खड्गहस्तस्य पुरुषस्य निष्क्रमणपर्यन्तम्।

4-भारतीवृत्तिः - भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः।

तस्यां संस्कृतभाषायाः प्रयोगः अधिकतया दृश्यन्ते। तस्याः अङ्गचतुष्टयं। भारतीवृत्तेरङ्गानि- १ प्ररोचना २ वीथी ३ प्रहसनं ४ आमुखं।

✦✦✦✦✦

नाट्योक्तयः -

स्वगतं - यद् अश्राव्यं वस्तु तद् ।

प्रकाशं - यद् सर्वश्राव्यं वस्तु तद् ।

अपवारितं- स्थानान्तरं गत्वा अन्यस्य जनस्य समीपे यत् रहस्यं वस्तु प्रकाश्यते तत् ।

जनान्तिकं- त्रिपताकाकरेण अन्यान् अपवार्य कथामध्ये यत् जनान्ते अन्योन्यामन्त्रणं तत् जनान्तिकं ।

आकाशभाषितं - नाट्ये पात्रं विना अकथितं अपि अर्थं श्रुत्वा इव किं ब्रवीषि इति यत् प्रयुज्यते तत् ।

✦✦✦✦✦

पात्राणां नामानि -

साहित्यदर्पणे केषां कथापात्राणां किं किं नाम कार्यमिति निर्देशः दत्तः अस्ति । स तु एवं प्रदश्यर्ते .

| भूमिका | पात्रनाम |
|---|---|
| वेश्या | दत्ता , सिद्धा, सेना |
| वणिक् | दत्तपदान्तानि पदानि |
| चेटानां चेट्योः च | वसन्तप्रभृतिषु ऋतुषु वर्ण्यस्य वस्तुनः नाम । उदा- कलहंसः |

रूपकभेदानां नाम कथं स्यादिति निर्देशः अपि तत्र दृश्यते ।तदित्थं-

नाटकस्य- गर्भितार्थप्रकाशकं नाम-उदा रामाभुदयं ।

प्रकरणादिषु- नायिकानायकाख्यानात् संज्ञा- उदा मालतीमाधवं ।

नाटिकासट्टकादीनाम् उपरूपकविशेषाणाम् - नायिकाभिर्विशेषणम् । उदा- रत्नावली ।

✦✦✦✦✦

पात्राणां संबोधननियमानि -कः कैः कथम् इति क्रमेण सम्बोधनप्रकारान् विवृणुते ।

| कः | कैः | कथम् |
|---|---|---|
| राजा | भृत्यैः | देव, स्वामी |
| राजा | अधमैः | भट्ट |
| राजा | राजर्षिभिः विदूषकेण च | वयस्य |
| राजा | ऋषिभिः | अपत्यप्रत्ययेन |
| राजा | विप्रैः | स्वेच्छया |
| विप्रः | क्षत्रिय- वैश्य -शूद्रैः | आर्य |
| विदूषकः | राज्ञा | वयस्य नाम्ना |
| सूत्रधारः | नट्या | आर्य |
| नटी | सूत्रधारेण | आर्ये |
| सूत्रधारः | पारिपार्श्विकेन | भाव |
| पारिपार्श्विकः | सूत्रधारेण | मारिष |
| अधमाः जनाः | अधमैः जनैः | हण्डे |
| उत्तमजनाः | उत्तमजनैः | वयस्य |
| मध्यमजनाः | मध्यमजनैः | हंहो |
| अग्रजः | कनिष्ठैः भ्रातृभिः | आर्य |
| देवाः ऋषयः लिङ्गिनः च | सर्वैः | भगवन् |
| राज्ञी चेटी च | विदूषकेन | भवती |
| रथी | सूतेन | आयुष्मन् |
| वृद्धः | वृद्धभिन्नेन | तात |
| सुतः शिष्यः अनुजः च | पित्रा गुरुणा ज्येष्ठेन च | वत्स पुत्रक तात गोत्रनाम्ना वा |
| अमात्यः | अधमैः जनैः | आर्य |
| अमात्यः | विप्रैः | अमात्य सचिव वा |
| तपस्वी प्रशान्तः च | बुधैः | साधो |
| पूज्यः | शिष्याद्यैः | नामग्रहणमकृत्वा |
| आचार्यः | शिष्याद्यैः | उपाध्याय |
| भूपतिः | शिष्याद्यैः | महाराज स्वामी च |

| | | |
|---|---|---|
| युवराजः | अधमैः | कुमार भर्तृदारकः वा |
| कुमारकः | अधमैः | भद्र सौम्यमुख |
| राजकुमारी | प्रकृतिभिः | भर्तृदारिका |
| स्त्रियः | सर्वैः | पत्युः नामानुसारं |
| सखी | स्त्रीभिः | झल |
| दासी | स्त्रीभिः | हञ्जा |
| वेश्या | स्त्रीभिः | अज्जुका |
| कुट्टनी | अनुगतैः | अम्बा |
| पूज्या जरती | अनुगतैःजनैः | अम्बा |
| पाषण्डाः | सर्वैः | स्वसमयागतैः नामभिः |
| शाक्यादयः | सर्वैः | भद्रदत्तादिनामभिः |

अन्याः जनाः तेषां कर्म शिल्पं विद्याम् जातिं च आश्रित्या संबोधयितव्याः।

✦✦✦✦✦

भाषाविभागः

साहित्यदर्पणे पात्रानुसारं उपयोक्तव्या भाषा का इति निर्देशः द्रष्टुं शक्यते।

| पात्रनाम | भाषा | काव्यविशेषनिर्देशः |
|---|---|---|
| अनीचानां पुरुषाणां | संस्कृतं | |
| विदुषीणां स्त्रीणां | शौरसेनी | |
| विदुषीणां स्त्रीणां | महाराष्ट्री | गथासु |
| राजान्तपुरचारिणां | मागधी | |
| चेटानाम् राजपुत्राणाम् श्रेष्टानाम् च | अर्धमागधी | |
| विदूषकादीनाम् | प्राच्या | |
| धूर्तानां | आवन्ती | |
| योधानां नागरिकाणां च | दाक्षिणात्या | |

| | | |
|---|---|---|
| शबराणाम् शकादीनाम् च | शाबरी | |
| उदीच्यानां | बाह्लीकभाषा | |
| द्रविडादिषु | द्राविडी | |
| आभीरेषु | आभीरी | |
| पुक्कसादिषु | चाण्डाली | |
| काष्ठपात्रोपजीविषु | आभीरी शाबरी वा | |
| अङ्गारकादौ | पैशाची | |
| अनीचानां चेटानाम् | शौरसेनी | |
| बालानां षण्डकाणां नीचानां ग्रहविचारिणां उन्मत्तनां आतुराणां च | शौरसेनी संस्कृतं वा | |
| दरिद्रस्य ऐश्वर्येण प्रमत्तस्य भिक्षूणां वल्कलधारिणां | प्राकृतं | |
| उत्तमासु लिङ्गिनीषु देवीमन्त्रिसुतावेश्यासु | संस्कृतं | |

नीचपात्रं यस्मिन् देशे भवः तस्मिन् देशे वर्त्तमाना भाषा एव तस्य देया। कार्त्तव्यमाश्रित्य सर्वेषां उत्तमपात्राणां भाषाविपर्ययः कार्यः। नैपुण्यज्ञापनार्थं स्त्री सखीबालवेश्याकितवाप्सरसां संभाषणस्य मध्येमध्ये संस्कृतं देयम्।

✦✦✦✦✦

नाटकेषु षट् त्रिंशल्लक्षणानि त्रयस्त्रिंशत् नाट्यालंकृतयः त्रयोदश वीथ्यङ्गानि च प्रयोज्यानि।

षट्त्रिंशल्लक्षणानि

भूषणाक्षरसंघातौ शोभोदाहरणं तथा।

हेतुसंशयदृष्टान्तस्तुल्यतर्कः पदोच्चयः।

निदर्शनाभिप्रायौ च प्राप्तिर्विचार एव च।

दिष्टोपदिष्टे च गुणातिपातातिशयौ तथा।

विशेषणनिरुक्ती च सिद्धिभ्रंशविपर्ययौ।

दाक्षिण्यानुनयौ मालार्थापत्तिर्गर्हणं तथा॥

पृच्छा प्रसिद्धिः सारूप्यं संक्षेपो गुणकीर्तनम्।

लेशो मनोरथोऽनुक्तिसिद्धिः प्रियवचस्तथा॥

१ भूषणलक्षणं- गुणैः सालङ्कारैः योगस्तु भूषणं।

यथा- आक्षिपन्त्यरविन्दानि मुग्धे तव मुखश्रियम्।

कोषदण्डसमग्राणां किमेषामस्ति दुष्करम्।

अत्र अर्थश्लेषमूलः अर्थान्तरन्यासः अलङ्कार माधुर्यगुणश्च।

२ अक्षरसंघातलक्षणं- वर्णनाक्षरसंघातस्चित्रार्थैरक्षरैर्मितैः।

यथा शाकुन्तले राजा- कश्चित्सखीं वो नातिबाधते शरीरसंतापः।

प्रियंवदा- साम्प्रदं लब्धौषधः उपशमं गमिष्यति।

अत्र मितैः अक्षरैः भवान् अस्याः शरीरसन्तापमुपशमयतु इति सूचितं।

३ शोभालक्षणं- सिद्धैरर्थैः समं यत्राप्रसिद्धोऽर्थः प्रकाशते।

श्लिष्टलक्षणचित्रार्था सा शोभेत्यभिधीयते।

यथा- सद्वंशसंभवः शुद्धः कोटिदोऽपि गुणान्वितः।

कामं धनुरिव क्रूरो वर्जनीयः सतां प्रभुः।

अत्र प्रभुपक्षे विद्यमानानि एव पदानि श्लेषेण अप्रसिद्धं धनुः च सूचयति।

४ उदाहरणलक्षणं- यत्र तुल्यार्थयुक्तेन वाक्येनाभिप्रदर्शनात्।

साध्यतेऽभिमतश्चार्थस्तदुदाहरणं मतम्।

यथा-

अनुयान्त्या जनातीतं कान्तं साधु त्वया कृतम्।

का दिनश्रीर्विनार्केण का निशा शशिना विना॥

अत्र अर्कं विना दिनश्रीरिव शशिनं विना निशाश्रीरिव कान्तं विना कन्ता अपि शोभारहितेति साध्यते।

५ हेतुलक्षणं- हेतुर्वाक्यं समासोक्तमिष्टकृद्धेतुदर्शनात्।

यथा वेण्यां भीमं प्रति चेटी- एवं मया भणितं भानुमति युष्माकममुक्तेषु केशेषु कथं देव्याः केशाः संयम्यन्ते।

अत्र दुर्योधनवधे सति तत्परिजनस्त्रियः केशान् मोक्षिष्यन्ते तदा एव द्रौपदीकेशसंयमः भवेदिति सूचना।

६ संशयलक्षणं- संशयोऽज्ञाततत्त्वस्य वाक्ये स्याद्यदनिश्चयः।

यथा ययातिविजये-

इयम् स्वर्गाधिनाथस्य लक्ष्मीः किं यक्षकन्यका।

किं चास्य विषयस्यैव देवता किमु पार्वती।

७ दृष्टान्तलक्षणं- दृष्टान्तो यस्तु पक्षेऽर्थसाधनाय निदर्शनम्।

यथा वेण्याम्- सहदेवः -आर्यः उचितमेवैतत्तस्याः यतो दुर्योधनकलत्रं हि सा। इत्यादि।

८ तुल्यतर्कलक्षणं- तुल्यतर्को यदर्थेन तर्कः प्रकृतगामिना।

यथा तत्रैव- प्रायेणैव हि दृश्यन्ते कामं स्वप्नाः शुभाशुभाः।

शतसंख्या पुनरियं सानुजं स्पृशतीव माम्।

९ पदोच्चयलक्षणं- संचयोऽर्थानुरूपो यः पदानां स पदोच्चयः।

यथा शाकुन्तले- अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।

कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धं।

१० निदर्शनलक्षणं- यत्रार्थानां प्रसिद्धानां क्रियते परिकीर्तनम्।

परपक्षव्युदासार्थं तन्निदर्शनमुच्यते॥

य्था- क्षात्रधर्मोचितैर्धर्मैरलं शत्रुवधे नृपाः

किं तु बालिनि रामेण मुक्तो बाणः पराङ्मुखे॥

११ अभिप्रायलक्षणं- अभिप्रायस्तु सादृश्यादभूतार्थस्य कल्पना॥

यथा शाकुन्तले- इदं किलाव्याजमनोहरं वपुस्तपःल्कमं साध्यितुं य इच्छति।

ध्रुवम् स नीलोत्पलपत्रधारया शमीतरुं छेत्तुमृषिर्व्यवस्यति।

12 प्राप्तिलक्षणं- प्राप्तिः केनचिदंशेन किञ्चिद्यत्रानुमीयते।

यथा प्रभावत्यां -

अनेन खलु सर्वतश्चरता चञ्चरीकेणावश्यं विदिता भविष्यति प्रियतमा मे प्रभावती॥

१३ विचारलक्षणं- विचारो युक्तिवाक्यैर्यदप्रत्यक्षार्थसाधनम्।

यथा मम चन्द्रकलायां- राजा- नूनमियमन्तः पिहितमदनविकारा वर्तते। यतः- हसति परितोषरहितं निरीक्ष्यमाणापि नेक्षते किञ्चित्। सख्यामुदाहरन्त्यामसमञ्जसमुत्तरं दत्ते।

१४ दिष्टलक्षणं- देशकालस्वरूपेण वर्णना दिष्टमुच्यते।

यथा वेण्यां- सहदेवः-

यद्वैद्युतमिव ज्योतिरार्ये क्रुद्धेऽद्य संभृतम्।

तत्प्रावृडिव कृष्णेयं नूनं सवर्द्धयिष्यति॥

१५ उपदिष्टलक्षणं- उपदिष्टं मनोहारि वाक्यं शास्त्रानुसारतः।

यथा शाकुन्तले-

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने

भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।

भूयिष्ठं भव दक्षिणापरिजने भाग्येष्वनुत्सेकिनी

यान्त्येतं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥

१६ गुणातिपातलक्षणं- गुणातिपातः कार्यं यद्विपरीतं गुणान्प्रति ॥

यथा मम चन्द्रकलायां चन्द्रं प्रति-

यदि संह्रियते तमो गृह्यते सकलस्ते पादः।

वससि शिरसि पशुपतेस्तथाऽपि हा स्त्रियाः जीवनं हरसि।

१७ गुणातिशयलक्षणं- यः सामान्यगुणोद्रेकः स गुणातिशयो मतः।

यथा चन्द्रकलायां - राजा- चन्द्रकलायाः मुखं निर्दिश्य

असावन्तश्चञ्चद्विकचनवनीलाब्जयुगल-

स्तलस्फूर्जत्कम्बुर्विलसदलिसंघात उपरि।

विना दोषासङ्गं सततपरिपूर्णाखिलकलः

कुतः प्राप्तश्चन्द्रो विगलितकलङ्कः सुमुखि ते।

१८ विशेषणलक्षणं- सिद्धानर्थान् बहूनुक्त्वा विशेषोक्तिर्विशेषणम्-

यथा तृष्णापहारी विमलो द्विजावासो जनप्रियः

ह्रदः पद्माकरः किन्तु बुधस्त्वं स जलाशयः॥

१९ निरुक्तिलक्षणं- पूर्वसिद्धार्थकथनं निरुक्तिरिति कीर्त्यते।

यथा वेण्याम्- निहताशेषकौरव्यः इत्यादि।

२० सिद्धिलक्षणं-बहूनां कीर्तनं सिद्धिरभिप्रेतार्थसिद्धये॥

यथा- यद्वीर्यं कूर्मराजस्य यश्च शेषस्य विक्रमः।

पृथिव्या रक्षणे राजन्नेकत्र त्वयि तत्स्थितं।

२१ भ्रंशलक्षणं- दृप्तादीनां भवेद् भ्रंशो वाच्यादन्यतरद्वचः।

यथा वेण्याम् - कञ्चुकिनं प्रति दुर्योधनः-

सहभृत्यगणं सबान्धवं सहमित्रं ससुतम् सहानुजम्।

स्वबलेन निहन्ति संयुगे नचिरात्पाण्डुसुतः सुयोधनं।

अत्र सुयोधनं पाण्डुसुतम् इति वक्तव्ये क्रोधोद्वेगात् पाण्डुसुतः सुयोधनम् इति उक्तम्।

२२ विपर्ययलक्षणं- विचारस्यान्यथाभावः संदेहात्तु विपर्ययः।

यथा- मत्वा लोकमदातारं संतोषे यैः कृतामतिः।

त्वयि राजनि ते राजन्न तथा व्यवसायिनः॥

२३ दाक्षिण्यलक्षणं- दाक्षिण्यं चेष्टया वाचा परचित्तानुवर्तनम्।

वाचा यथा- प्रसाधय पुरीं लङ्कां राजा त्वं हि विभीषण।

आर्येणानुगृहीतस्य न विघ्नः सिद्धिमन्तरा।

२४ अनुनयलक्षणं- वाक्यैः स्निग्धैरनुनयो भवेदर्थस्य साधनम्।

यथा वेण्याम् अश्वत्थामानं प्रति कृपः- दिव्यास्त्रग्रामकोविदे भारद्वाजतुल्यपराक्रमे किं न संभाव्यते त्वयि।

२५ मालालक्षणं- माला स्याद्यदभीष्टार्थं नैकार्थप्रतिपादनम्।

यथा शाकुन्तले-राजा- किं शीकरैः क्लमविमर्दिभिरार्द्रवातं सञ्चरयामि नलिनीदलतालवृन्तम्।

अङ्के निवेश्य चरणावुत पद्मताम्रौ समं वाहयामि करभोरु यथासुखं॥

२६ अर्थापत्तिलक्षणं- अर्थापत्त्रिर्यदन्यार्थोऽर्थान्तरोक्तेः प्रतीयते।

यथा वेण्यां-

द्रोणोऽश्वत्थामानं राज्येऽभिषेक्तुमिच्छतीति कथयन्तं कर्णं प्रति राजा- साधु अङ्गराज साधु कथमन्यथा-

दत्त्वाभयं सोऽतिरथो वध्यमानं किरीटिना

सिधुराजमुपेक्षेत नैवं चेत्कथमन्यथा।

२७ गर्हणं- दूषणोद्घोषणायां तु भर्त्सना गर्हणं तु तत्।

यथा वेणीसंहारे - कर्णं प्रति- अश्वत्थामा-

निर्वीर्यं गुरुशापभाषितवशात्किं मे तवेवायुधं

संप्रत्येवभयाद्विहाय समरं प्राप्तोऽस्मि किं त्वं यथा।

जातोऽहं स्तुतिवंशकीर्तनविदां किं सारथीनां कुले।

क्षुद्रारातिकृताप्रियं प्रतिकरोम्यस्त्रेण नास्त्रेण यत्॥

२८ पृच्छालक्षणं- अभ्यर्थनापरैर्वाक्यैः पृच्छार्थान्वेषणं मता।

यथा वेणीसंहारे सुन्दरकः- आर्याः अपि नाम सारथिद्वितीयो दृष्टो युष्माभिर्महाराजो दुर्योधनो न वे ति।

२९ प्रसिद्धिलक्षणं- प्रसिद्धिर्लोकसिद्धार्थैरुत्कृष्टैरर्थसाधनम्।

यथा विक्रमोर्वश्याम्- राजा सूर्यचद्रमसौ यस्य मातामहपितामहौ।

स्वयं कृतः पतिर्द्वाभ्यामुर्वश्या च भुवा च यः।

३० सारूप्यलक्षणं-सारूप्यमनुरूपस्य सारूप्यात्क्षोभवर्धनम्॥

यथा वेणीसंहारे दुर्योधनभ्रान्त्या भीमं प्रति।

युधिष्ठिरः- दुरात्मन् दुर्योधनहतकः इत्यादि।

३१ संक्षेपलक्षणं- संक्षेपो यत्तु संक्षेपादात्मान्यार्थे प्रयुज्यते।

यथा चन्द्रकलायाम्-राजा- प्रिये

अङ्गानि शेदयसि किं शिरीषकुसुमपरिपेलवानि मुधा।

अयमीहितकुसुमानां संपादयिता तवास्मि दासजनः॥

३२ गुणकीर्तनलक्षणं- गुणानां कीर्तनं यत्तु तदेव गुणकीर्तनम्।

यथा चित्रकलायां -

नेत्रे खञ्जनगञ्जने सरसिजप्रत्यर्थि- इत्यादि।

३३ लेशलक्षणं- स लेशो भण्यते वाक्यं यत्साद‍ृश्यपुरःसरम्।

यथा वेणीसंहारे- राजा-

हते जरति गाङ्गेये पुरस्कृत्य शिखण्डिनम्।

या श्लाघा पाण्डुपुत्रानां सैवाऽस्माकं भविष्यति।

३४ मनोरथलक्षणं- मनोरथस्त्वभिप्रायस्योक्तिर्भङ्ग्यन्तरेण यत्।

यथा-

रतिकेलिकलः किंचिदेव मन्मथमन्थरः।

पश्य सुभ्रु समालम्भात्कादम्बश्चुम्बति प्रियाम्।

३५ अनुक्तसिद्धिलक्षणं- विशेषार्थोहविस्तारोऽनुक्तसिद्धिरुदीर्यते।

यथा गृहवृक्षवाटिकायां -

द‍ृश्येते तन्वि यावेतौ चारुचन्द्रमसं प्रति।

प्राज्ञे कल्याणनामानावुभौ तिष्यपुनर्वसू॥

३६ प्रियवचलक्षणं- स्यात्प्रमाणयितुं पूज्यं प्रियोक्तिर्हर्षभाषणं-

यथा शाकुन्तले-

उदेति पूर्वं कुसुमं ततः फलं घनोदयः प्राक्तदनन्तरं पयः।

निमित्तनिमित्तिकयोरयं विधिस्तव प्रसादस्य पुरस्तु सम्पदः।

✦✦✦✦✦

अथ नाट्यालङ्काराः-

आशीराक्रन्दकपटाक्षमागर्वोद्यमाश्रयाः।

उत्प्रासनस्पृहाक्षोभपश्चात्तापोपत्तयः॥

आशंसाध्यवसायौ च विसर्पोल्लेखसंज्ञितौ।

उत्तेजनं परीवादो नीतिरथविशेषणम्।

प्रोत्साहनं च साहाय्यमभिमानोऽनुवर्तनम्।

उत्कीर्त्तनं तथा याच्ञा परिहारो निवेदनम्।

प्रवर्तनाख्यानयुक्तिप्रहर्षाश्चोपदेशनम्।

इति नाट्यालङ्कृतयो नाट्यभूषणहेतवः।

१ आशीर्लक्षणं- आशीरिष्टजनाशंसा।

यथा शाकुन्तले-

ययातेरिव शर्मिष्ठा पत्युर्बहुमता भव।

पुत्रं त्वमपि सम्राजं सेव पुरुमवाप्नुहि।

२ आक्रन्दलक्षणं- आक्रन्दः प्रलपितं शुचा।

यथा वेणीसंहारे- कञ्चुकी- हा देवि कुन्ति राजभवनपताके इत्यादि।

३ कपटलक्षणं- कपटं मायया यत्र रूपमन्यद्विभाव्यते।

यथा कुलपत्यङ्के -मृगरूपं परित्यज्य विधाय कपटं वपुः।

नीयते रक्षसा तेन लक्ष्मणो युधि संशयम्॥

४ अक्षमालक्षणं-अक्षमा सा परिभवः स्वल्पोऽपि न विषह्यते।

यथा शाकुन्तले- राजा- भोः सत्यवादिन्। अभ्युपगतं तावदस्माभिः। किं पुनरिमामतिसन्धाय लभ्यते।

शार्ङ्गरवः- विनिपातः इत्यादि।

५ गर्वलक्षणं- गर्वोऽवलेपजं वाक्यम्।

यथा शाकुन्तले राजा- ममापि नाम सत्त्वैरभिभूयन्ते गृहा।

६ उद्यमलक्षणं- कार्यस्यारम्भ उद्यमः।

यथा कुम्भाङ्के- रावणः- पश्यामि शोकविवशोन्तकमेव तावत्।

७ आश्रयलक्षणं- ग्रहणं गुणवत्कार्यहेतोराश्रय उच्यते।

यथा विभीषणनिर्भर्त्सनाङ्के- विभीषणः- राममेवाश्रयामि। इति।

८ उत्प्रासनलक्षणं- उत्प्रासनं तूपहासो योऽसाधौ साधुमानिनि।

यथा शाकुन्तले।

शार्ङ्गरवः- राजन् अथ पुनः पूर्ववृत्तान्तमन्यसङ्गाद्विस्मृतो भवान्। तत्कथमधर्मभीरोर्दारपरित्यागः इत्यादि।

९ स्पृहालक्षणं- आकाङ्क्षा रमणीयत्वाद्वस्तुनो या स्पृहा तु सा।

यथा शाकुन्तले राजा- चारुणा स्फुरितेनायमपरिक्षतकोमलः।

पिपासतो ममानुज्ञां ददातीव प्रियाधरः।

१० क्षोभलक्षणं- अधिक्षेपवचःकारी क्षोभः प्रोक्तः स एव तु।

यथा त्वया तपस्विचाण्डाल प्रच्छन्नवधवर्तिना।

न केवलं हतो बाली स्वात्मा च परलोकतः।

११ पश्चात्तापलक्षणं- मोहावधीरितार्थस्य पश्चात्तापः स एव तु।।

यथा आनतापाङ्के- रामः- किं देव्या न विचुम्बितोऽस्मि बहुशो मिथ्याभिशप्तस्तदा। इति।

१२ उपपत्तिलक्षणं- उपपत्तिर्मता हेतोरुपन्यासोऽर्थसिद्धये ।

यथा वध्यशिलायां ।-म्रियते म्रियमाणे या त्वयि जीवति जीवति ।

तां यदीच्छसि जीवन्तीं रक्षात्मानं ममासुभिः ॥

१३ आशंसालक्षणं- आशंसनं स्यादाशंसा ।

यथा श्मशाने माधवः तत्पश्येयमनङ्गमङ्गलगृहं भूयोऽपि तस्या मुखम् इति ।

१४ प्रतिज्ञालक्षणं-प्रतिज्ञाध्यवसायकः ।

यथा प्रभावत्यां वज्रनाभः - अस्य वक्षः क्षणेनैव निर्मथ्य गदयानया ।

लीलयोन्मूलयाम्येष भुवनद्वयमद्य वः ।

१५ विसर्पलक्षणं- विसर्पो यत्समारब्धं कर्मानिष्टफलप्रदम् ।

यथा वेणीसंहारे- एकस्यैषविपाकोऽयम् । इत्यादि ।

१६ उल्लेखलक्षणं- कार्यदर्शनमुल्लेखः ।

यथा शाकुन्तले राजानं प्रति तापसौ । समिदाहरणाय प्रस्थितावावाम् । इह चास्मद्गुरोः कुलपतेः साधिदैवत इव शकुन्तलयानुमालिनीतीरमाश्रमो दृश्यते । न चेदन्यथा कार्यातिपातः प्रविश्य गृह्यतामतिथिसत्कारः । इति ।

१७ उत्तेजनलक्षणं- उत्तेजनमितीष्यते । स्वकार्यसिद्धयेऽन्यस्य प्रेरणाय कठोरवाक् ।

यथा- इन्द्रजिच्चण्डवीर्योऽसि नाम्नैव बलवानसि ।

धिग्धिक्प्रच्छन्नरूपेण युध्यसेऽस्मद्भयाकुलः ॥

१८ भर्त्सनालक्षणं - भर्त्सना तु परीवादः ।

यथा सुन्दराङ्के- दुर्योधनः- धिग् धिक् सूत किम् कृतवानसि । वत्सस्य मे प्रकृतिदुर्ललितस्य पापः कथम् विधास्यति । इत्यादि ।

१९ नीतिलक्षणं- नीतिः शस्त्रेण वर्तनम् ।

यथा शाकुन्तले-दुष्यन्तः विनीतवेषप्रवेश्यानि तपोवनानि इति ।

२० अर्थविशेषणलक्षणं- उक्तस्यार्थस्य तत्तु स्यादुत्कीर्तनमनेकथा ।

उपालम्भविशेषेण तत् स्यादर्थविशेषणं ।

यथा शाकुन्तले राजानं प्रति शार्ङ्गरवः- आः कथमिदं नाम किमुपन्यस्तमिति । ननु भवानेव नितरां लोकवृत्तान्तनिष्णातः ।

सतीमपि ज्ञातिकुलेकसंश्रयां जनोऽन्यथा भर्तृमती विशङ्कते ।

अतः समीपे परिणेतुरिष्यते प्रियाप्रिया वा प्रमदा स्वबन्धुभिः ।

२१ प्रोत्साहनलक्षणं- प्रोत्साहनं स्यादुत्साहगिरां कस्यापि योजनम् ।

यथा बालरामायणे- कालरात्रिकरालेयं स्त्रीति किं विचिकित्ससि । तज्जगत्त्रितयं त्रातुं तात ताडय ताडकाम् ।

२२ साहाय्यलक्षणं- साहाय्यं सङ्कटे यत्स्यात् सानुकूल्यं परस्य च।

यथा वेणीसंहारे कृपं प्रति अश्वत्थामा- त्वमपि तावद्राज्ञः पार्श्ववर्ती भव।

कृपः- वाञ्छाम्यहमद्य प्रतिकर्तुम्। इत्यादि

२३ अभिमानलक्षणं- अभिमान स एव स्यात्।

यथा तत्रैव दुर्योधनः- मातः किमप्यसदृशं कृपणं वचस्ते। इत्यादि।

२४ अनुवर्तनलक्षणं- प्रश्रयादनुवर्तनम् अनुवृत्तिः।

यथा शाकुन्तले- राजा- शकुन्तलां प्रति अयि तपो वर्धते। अनसूया- इदानीम् अतिथिविशेषलाभेण इत्यादि।

२५ उत्कीर्तनलक्षणं- भूतकार्याख्यानमुत्कीर्तनम् मतम्।

यथा बालरामायने- अत्रासीत्फनिपाशबन्धनविधिः शक्त्या भवद्देवरे।

गाढं वक्षसि ताडिते हनुमता द्रोणाद्रिरत्राहृतः। इत्यादि।

२६ यच्ञालक्षनम्- याच्ञा तु क्वापि याच्ञा या स्वयं दूतमुखेन वा।

यथा अद्यापि देहि वैदेहीं दयालुस्त्वयि राघवः
शिरोभिः कन्दुकक्रीडां किम् कारयसि वानरान्॥

२७ परिहारलक्षणं- परिहार इति प्रोक्तः कृतानुचितमार्जनम्।

यथा प्राणप्रयाणदुःखार्तम् उक्तवानस्म्यनक्षरम्।
तत्क्षमस्व विभो किम् च सुग्रीवस्ते समर्पितः॥

२८ निवेदनलक्षणं - अवधीरितकर्तव्यकथनं तु निवेदनम्।

यथा राघवाभ्युदये लक्ष्मणः- आर्य समुद्राभ्यर्थनया गन्तुमुद्यतोऽसि तत्किमेतत्।

२९ प्रवर्तनलक्षणं- प्रवर्तनं तु कार्यस्य यत्स्यात्साधुप्रवर्तनम्।

यथा वेणीसंहारे- राजा- कञ्चुकिन् देवस्य देवकीनन्दनस्य बहुमानाद्वत्सस्य भीमसेनस्य विजयमङ्गलाय प्रवर्तन्तां तत्रोचिताः समारम्भाः।

३० आख्यानलक्षणं- आख्यानं पूर्ववृत्तोक्तिः।

यथा वेणीसंहारे- देशः सोऽयमरातिशोणितजलैर्यस्मिन् ह्रदाः पूरिताः। इत्यादि।

३१ युक्तिलक्षणम्- युक्तिरर्थावधारणं।

यथा वेणीसंहारे- यदि समरमपास्य नास्ति मृत्योर्भयमिति युक्तिमितोऽन्यतः प्रयातुम्।
अथ मरणमवश्यमेव जन्तो : किमिति मुधा मलिनं यशः कुरुध्वम्।

३२ प्रहर्षलक्षणम्- प्रहर्षः प्रमदाधिक्यं।

यथा शाकुन्तले राजा- तत्किमिदानीमात्मानं पूर्णमनोरथं नाभिनन्दामि।

३३ उपदेशनलक्षणम् - शिक्षा स्यादुपदेशनं।

यथा शाकुन्तले सखि न युक्तमश्रमवसिनो जनस्य अकृतसत्कारमतिथिविशेषमुज्झित्वा स्वच्छन्दतो गमनं।

इति।

☼ ☼ ☼ ☼ ☼ ☼ ☼ ☼ ☼

# MODULE - III

**लास्याङ्गानि** -स्त्रीनृत्यं लास्यमुच्यते। दशसंख्यकानि लास्याङ्गानि सलक्षणं प्रतिपादयति विश्वनाथः।

गेयपदं स्थितपाठ्यमासीनं पुष्पगण्डिका॥
प्रच्छेदकस्त्रिगूढं च सैन्धवाख्यं द्विगूढकम्
उत्तमोत्तमकम् चान्यदुक्तप्रत्युक्तमेव च।
लास्ये दशविधं ह्येतदङ्गमुक्तं मनीषिभिः।

तत्र एकैकस्य लक्षणं वक्ष्ये-

१ गेयपदम्- तन्त्रीभाण्डं पुरस्कृत्योपविष्टस्यासने पुरः शुद्धं गानं गेयपदम्।

वीणायन्त्रं पुरस्कृत्य देवाद्यग्रे आसने उपविष्टस्य जनस्य नृत्यरहितं शुद्धं गानं गेयपदम्।यथा गौरीगृहे विणां वादयन्त्याः मलयवत्याः गानं।

२ स्थितपाठ्यं - स्थितपाठ्यं तदुच्यते मदनोत्तापिता यत्र पठति प्राकृतं स्थिता।

कामोत्तापिता नारी स्थिता सती प्राकृते यत् पठति तत् स्थितपाठ्यम्।

३ आसीनं- निखिलातोद्यरहितं शोकचिन्तान्विताबला।
अप्रसाधितगात्रं यदासीनमासीनमेव तत्।

निरलङ्कारा शोकचिन्ताकलुषितहृदया आसीना स्त्री वाद्यैः रहिता सती यद् गायति तत् आसीनमिति उच्यते।

४ पुष्पगण्डिका - आतोद्यमिश्रितं गेयं छन्दांसि विविधानि च।
स्त्रीपुंसयोर्विपर्यासचेष्टितं पुष्पगण्डिका।

यस्मिन् वादित्रसहितं गानं वृत्तबद्धानि पद्यानि स्त्रीपुंसयोः विपर्यासचेष्टितं च दृश्यते तत् पुष्पगण्डिका।

५ प्रच्छेदकः- अन्यासक्तं पतिं मत्वा प्रेमविच्छेदमन्युना।
वीणापुरःसरं गानं स्त्रियाः प्रच्छेदकोमतः॥

पतिं अन्यासक्तां मत्वा प्रणयभङ्गशोकेन युक्ता स्त्री विणापुरःसरं यः गायति सः प्रच्छेदकः।

६ त्रिगूढकं- स्त्रीवेषधारिणां पुसां नाट्यं श्लक्ष्णं त्रिगूढकम्।

स्त्रीवेषधारिणः पुरुषा तत्र नाट्यं कुर्वन्ति।

यथा मालतीमाधवे मकरन्दस्य मालतीवेषधारणम्।

७ सैन्धवं- कश्चन भ्रष्टसंकेतः सुव्यक्तकरणान्वितः।
प्राकृतं वचनं वक्ति यत्र तत्सैन्धवं मतम्।

भ्रष्टसङ्केतः कश्चनपुरुषः विणाद्यातोद्यसहितः सन् प्राकृतं पठति चेत् सैधवं।

८ द्विगूढं- चतुरस्रपदं गीतं मुखप्रतिमुखान्वितं द्विगूढं रसभावाढ्यम्।
द्विगूढे पादचतुष्टयं मुखप्रतिमुखसन्धी रसभावसमन्वयश्च गीते दृश्यते।

९ उत्तमोत्तमकं -उत्तमोत्तमकं पुनः कोपप्रसादजमधिक्षेपयुक्तं रसोत्तरम्।

कोपात् प्रसादात् वा जातः अधिक्षेपः रसाश्रयः सन् श्रेष्ठतया तत्र परिलसति।

१० उक्तप्रत्युक्तं- हावहेलान्वितं चित्रश्लोकबन्धमनोहरम्।

उक्तिप्रत्युक्तिसंयुक्तं सोपालम्भमलीकवत्।

विलासान्वितगीतार्थमुक्तप्रत्युक्तमुच्यते।

विचित्राः श्लोकाः हावहेलाद्यलङ्काराः उक्तिप्रयुक्तयः अलिकवत् कृता भर्त्सना आतोद्ययुक्तं गीतं च उक्तप्रत्युक्ते दृश्यते।

✦✦✦✦✦

महानाटकलक्षणं - नाटकमेव सर्वैः पताकास्थानकैः दशभिः अङ्कैः च युक्तं सन् महानाटकमिति उच्यते। उदा- बालरामायणम्।

✦✦✦✦✦

प्रकरणलक्षणम्-

भवेत्प्रकरणे वृत्तं लैकिकं कविकल्पितम्।
शृङ्गरोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक्।
सापायधर्मकामार्थपरो धीरप्रशान्तकः।
नायिका कुलजा क्वापि वेश्या क्वापि द्वयं क्वचित्।
तेन भेदस्त्रयस्तस्य तत्र भेदस्तृतीयकः॥

प्रकरणविशेषानाह-

१ लैकिकं कविकल्पितम् वृत्तं
२ शृङ्गरोऽङ्गी रसः
३ धीरप्रशान्तः विप्रः अमात्यः वणिक् वा नायकः।
४ कुलजा वेश्या द्वयं वा नायिका

उदा- मृच्छकटिकम्। मालतीमाधवम्।

✦✦✦✦✦

भाणलक्षणम्-

भाणः स्याद्धूर्तचरितो नानावस्थान्तरात्मकः।
एकाङ्कः एक एवात्र निपुणः पण्डितो विटः।
रङ्गे प्रकाशयेत्स्वेनानुभूतमितरेण वा॥
संबोधनोक्तिप्रत्युक्ती कुर्यादाकाशभाषितैः।
सूचयेद्वीरशृङ्गारौ शैर्यसौभाग्यवर्णनैः।
तत्रेतिवृत्तमुत्पाद्यं वृत्तिः प्रायेण भारती।
मुखनिर्वहणे सन्धी लास्याङ्गानि दशापि च।

प्रकरणविशेषानाह -

१ धूर्तचरितः

२ एकाङ्कः

३ विटः एव नायकः

४ उत्पाद्यं इतिवृत्तं

५ वृत्तिः भारती

६ मुखनिर्वहणे सन्धी

१० दश लास्याङ्गानि

उदा- लीलामधुकरः। महिषमङ्गलं भाणः।

✦✦✦✦✦

## व्यायोगलक्षणम्-

ख्यातेतिवृत्तो व्यायोगः स्वल्पस्त्रीजनसंयुतः।

हीनो गर्भविमर्शाभ्यां नरैर्बहुभिराश्रितः॥

एकाङ्कश्च भवेदस्त्रीनिमित्तसमरोदयः।

कैशिकीवृत्तिरहितः प्रख्यातस्तत्र नायकः।

राजर्षिरथ दिव्यो वा भवेद्धीरोद्धतश्च सः।

हास्यशृङ्गारशान्तेभ्य इतरेऽत्राङ्गिनो रसाः।

व्यायोगविशेषानाह-

१ ख्यातः इतिवृत्तः

२ स्वल्पस्त्रीजनसंयुतः

३ गर्भविमर्शाभ्यां रहितः

४ एकाङ्कः

५ अस्त्रीनिमित्तसमरोदयः

६ कैशिकीवृत्तिरहितः

७ प्रख्यातः नायकः

८ हास्यशृङ्गारशान्तेभ्य इतरे प्रधानरसाः

उदा - सौगन्धिकाहरणम्।

✦✦✦✦✦

समवकारलक्षणम् -

वृत्तं समवकारे तु ख्यातं देवासुराश्रयम्।

सन्धयो निर्विमर्शास्तु त्रयोऽङ्कास्तत्र चादिमे ॥

सन्धी द्वावन्त्ययोस्तद्वदेक एको भवेत्पुनः।

नायकाः द्वादशोदात्ताः प्रख्याताः देवमानवाः।

फलं पृथक्पृथक्तेषां वीरमुख्योऽखिलोरसः।

वीथ्यङ्गानि च तत्र स्युर्यथालाभं त्रयोदश।

गायत्र्युष्णिङ्मुख्यान्यत्र च्छन्दांसि विविधानि च।

त्रिशृङ्गारस्त्रिकपटः कार्यश्चायं त्रिविद्रवः।

वस्तु द्वादशनालीभिर्निष्पाद्यं प्रथमाङ्कगम्।

द्वितीयेऽङ्के चतसृभिर्द्वाभ्यामङ्के तृतीयके।

समवकारविशेषानाह-

१ ख्यातं देवासुराश्रयं वृत्तं

२ निर्विमर्शाः सन्धयः

३ त्रयः अङ्काः

४ द्वादशोदात्ताः प्रख्याताः देवमानवाः नायकाः

५ वीरः मुख्यः रसः

६ त्रयोदश वीथ्यङ्गानि

७ विविधानि च्छन्दांसि

८ त्रिशृङ्गारः त्रिकपटः त्रिविद्रवः च

त्रिशृङ्गारः- धर्मकृतः अर्थकृतः कामकृतः च।

त्रिकपटः- स्वाभाविकः कृत्रिमः दैवजः च।

विद्रवो नाम संभ्रमः। त्रिविद्रवः- अचेतनैः कृतः सचेतनैः कृतः चेतनाचेतनैः कृतः च।

९ प्रथमे अङ्के द्वादशनालीभिः निष्पाद्यं वस्तु।

द्वितीये अङ्के चतसृभिः नालीभिः निष्पाद्यं वस्तु ।

तृतीये अङ्के द्वाभां नालीभिः निष्पाद्यं वस्तु च दृश्यते।

घटिकाद्वयं नालिका इति उच्यते।

उदा- समुद्रमथनम्।

\+ + + + +

## डिमलक्षणम्-

मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः।

उपरागैश्च भूयिष्ठो डिमः ख्यातेतिवृत्तकः॥

अङ्गी रौद्ररसस्तत्र सर्वेऽङ्गानि रसाः पुनः।

चत्वारोऽङ्गा मता नेह विष्कम्भकप्रवेशकौ॥

नायका देवगन्धर्वयक्षरक्षोमहोरगाः।

भूतप्रेतपिशाचाद्याः षोडशात्यन्तमुद्धताः॥

वृत्तयः कैशिकीहीनाः निर्विमर्शाश्च सन्धयः।

दीप्ताः स्युः षड्रसाः शान्तहास्यशृङ्गारवर्जिताः।

उदा- त्रिपुरदाहः।

डिमविशेषानाह-

१ माया-इन्द्रजाल- संग्राम-क्रोध-उद्भ्रान्तादिचेष्टितैः-उपरागैश्च भूयिष्ठः

२ ख्यातेतिवृत्तकः

३ रौद्ररसः अङ्गी

४ विष्कम्भकप्रवेशकौ न भवतः

✦✦✦✦✦

## ईहामृगलक्षणम्-

ईहामृगो मिश्रवृत्तश्चतुरङ्कः प्रकीर्तितः।

मुखप्रतिमुखे सन्धी तत्र निर्वहणं तथा॥

नरदिव्यावनियमौ नायकप्रतिनायकौ।

ख्यातौ धीरोद्धतावन्यो गूढभावादयुक्तकृत्।

दिव्यस्त्रियमनिच्छन्तीमपहारादिनेच्छतः।

शृङ्गाराभासमप्यस्य किञ्चित्किञ्चित्प्रदर्शयेत्।

पताकानायका दिव्या मर्त्या वापि दशोद्धताः।

युद्धमानीय संरम्भं परं व्याजान्निवर्तते।

महात्मानां वधप्राप्ता अपि वध्याः स्युरत्र नो।

एकाङ्को देव एवात्र नैतेत्याहुः परे पुनः॥

दिव्यस्त्रीहेतुकं युद्धं नायकाः षडितीतरे॥

ईहामृगविशेषानाह-

१ ख्याताख्यातं इतिवृत्तं

२ चतुरङ्कः

३ मुखप्रतिमुखनिर्वहणाः सन्धयः

४ ख्यातौ धीरोद्धतौ नरदिव्यौ  नायकप्रतिनायकौ

५ प्रतिनायकः अनिच्छन्तीं दिव्यस्त्रियं इच्छति

६ दश उद्धताः पताकानायकाः

नायकः मृगवद् अलभ्यां नायिकां अत्र ईहते वाञ्छति इति ईहामृगः।

उदा- कुसुमशेखरविजयं

✦✦✦✦✦

## अङ्कलक्षणम्-

उत्सृष्टिकाङ्क एकाङ्को नेतारः प्राकृता नराः॥

रसोऽत्र करुणः स्थायी बहुस्त्रीपरिदेवितम्।

प्रख्यातमितिवृत्तं च कविर्बुद्ध्या प्रपञ्चयेत्।

भाणवत्सन्धिवृत्यङ्गान्यस्मिञ्जयपराजयौ।

युद्धं च वाचा कर्त्तव्यं निर्वेदवचनं बहु॥

अङ्कविशेषानाह-

१  एकाङ्कः

२  प्राकृता नराः नेतारः

३  करुणः रसः

४ प्रख्यातं इतिवृत्तं कविः बुद्ध्या प्रपञ्चयेत्

५ युद्धं  वाचा कर्त्तव्यं

✦✦✦✦✦

## वीथीलक्षणम्-

वीथ्यामेको भवेदङ्कः कश्चिदेकोऽत्रकल्प्यते।

आकाशभाषितैरुक्तैश्चित्रां प्रत्युक्तिमाश्रितः॥

सूचयेद्भूरि शृङ्गारं किञ्चिदन्यान् रसान् प्रति।

मुखनिर्वहणे सन्धी अर्थप्रकृतयोऽखिलाः॥

वीथी इव नानारसानां अत्र मालारूपतया स्थितत्वाद् वीथी इति नाम। उदा- मालविका।वीथीविशेषानाह-

१ एको अङ्कः

२ भूरि शृङ्गारं वृत्तं

३ मुखनिर्वहणे सन्धी

४ तत्र १३ वीथ्यङ्गानि सन्ति। तानि च-

उद्घात्यकं-अवलगितं- प्रपञ्चः-त्रिगतं-छलम्-वाक्केलिः-अधिबलं-गण्डं- अवस्यन्दितं-नालिका-असत्प्रलापः-व्याहारः-मृदवं च भवन्ति। तेषां स्वरूपमुच्यते-

✦✦✦✦✦

## वीथ्यङ्गानि-

अस्यास्त्रयोदशाङ्गानि निर्दिशन्ति मनीषिणः।

उद्घात्यकवलगिते प्रपञ्चस्त्रिगतं छलम्॥

वाक्केल्यधिबले गण्डमवस्यन्दितनालिके।

असत्प्रलापव्याहारमृदवानि च तानि तु।

एकैकस्य स्वरूपं उदाहरणं च दीयते।

३ प्रपञ्चलक्षणं-

मिथो वाक्यमसद्भूतं प्रपञ्चो हास्यकृन्मतः।

यथा विक्रमोर्वशीये विदूषकचेट्योः भाषणम्।

४ त्रिगतलक्षणं-

त्रिगतं स्यादनेकार्थयोजनं श्रुतिसाम्यतः।

यथा विक्रमोर्वशीये

राजा- सर्वक्षितिभृतां नाथ दृष्टा सर्वाङ्गसुन्दरी।
रामा रम्ये वनान्तेऽस्मिन् मया विरहिता त्वया॥

नेपथ्ये तथैव प्रतिशब्दः

राजा- कथं दृष्टेत्याह।

अत्र राज्ञा हे पर्वत मया विरहिता सुन्दरी स्त्री त्वया दृष्टा किं इति पृष्टे सति प्रतिशब्दः श्रूयते। मोहितः राजा तु तं पर्वतेन दत्तं उत्तरमिति स्वीकरोति। स च भ्रमः श्रुतिसाम्यात् अर्थलाभात् च संभवति। तदा तस्य अर्थः एवं भवति। यद्- हे राजन् त्वया विरहिता सुन्दरी स्त्री मया दृष्टा। राज्ञा श्रुतिसाम्यात् अनेकार्थयोजनं कृतमिति त्रिगतस्योदाहरणम्।

५ छललक्षणं- प्रियाभैरप्रियैर्वाक्यैर्विलोभ्य च्छलना च्छलम्।

यथा वेणीसंहारे- भीमार्जुनौ-

कर्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः सोऽभिमानी
राजा दुःशासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्रम्।
कृष्णाकेशोत्तरीयव्यपनयनपटुः पाण्डवा यस्य दासाः।
क्वाऽस्ते दुर्योधनोऽसौ कथयत न रुषा द्रष्टुमभ्यागतौ स्वः॥

अत्र आवां ज्ञातिप्रणयतः एव आगतौ न कोपेन इति दुर्योधनानुजीवीनं छलेन वदतः।

६ वाक्केलिलक्षणं- वाक्केलिर्हास्यसंबन्धो द्वित्रिप्रत्युक्तितो भवेत्।

यथा-

भिक्षो मांसनिषेवणं प्रकुरुषे किं तेन मद्यं विना
मद्यं चापि तव प्रियं प्रियमहो वाराङ्गनाभिः सह।
वेश्याऽप्यर्थरुचिः कुतस्तव धनं द्यूतेन चौर्येण वा
चौर्यद्यूतपरिग्रहोऽपि भवतो नष्टस्य कान्या गतिः।

मांसभोजनमधिकृत्य पृष्टः भिक्षुः अत्र न केवलं तत् किन्तु स्वकीयं मद्यासक्तिः वेश्यासंबन्धः द्यूतचौरप्रवृत्ती च प्रकाशयति। प्रश्नानां उत्तराणि हास्यं जनयति इति वक्केल्याः उदाहरणम्।

७ अधिबल लक्षणं- अन्योन्यवाक्याधिक्योक्तिः स्पर्थयाधिबलं मतम्।

पराभिभवेच्छया परस्परवचनैः आधिक्योक्तिः अधिबलं।

यथा प्रभावत्यां -

अस्य वक्षः क्षणेनैव निर्मथ्य गदयानया।
लीलयोन्मूलयाम्येष भुवनद्वयमद्य वः॥

प्रद्युम्नः- अरे रे असुरापसद अलममुना बहुप्रलापेन। मम खलु-

अद्य प्रचण्डभुजदण्डसमर्पितोरुकोदण्डनिर्गलितकाण्डसमूहपातैः।
आस्तां समस्तदितिजक्षतजोक्षितेयं क्षोणिः क्षणेन पिशिताशनलोभनीया॥

अत्र वज्रनाभप्रद्युम्नयोः स्पर्धया  गुणाधिक्यप्रतिपादनं अधिबलस्योदाहरणम्।

९ गण्डं लक्षणं- गण्डं प्रस्तुतसंबन्धि भिन्नार्थं सत्वरं वचः।

यथा वेणीसंहारे- राजा- अध्यासितुं तव चिराज्जघनस्थलस्य पर्याप्तमेव करभोरु ममोरुयुग्मम्।

अनन्तरं प्रविश्य

कञ्चुकी- देव भग्नं भग्नं इत्यादि। अत्र स्वपत्नीं प्रति शृङ्गारं धोतयन् दुर्योधनः उर्वोः सूचनां ददाति। किन्तु तन्मध्ये रथकेतनस्य भङ्गं सूचयितुं आगतः कञ्चुकी भग्नमिति वदति। तदा ऊरुभङ्गमेव नाटकस्यास्य परिणतिरिति जानन्तः सहृदयाः ऊरुयुग्मं भग्नम् इति योजयन्ति।

१० अवस्यन्दित लक्षणं- व्याख्यानं स्वरसोक्तस्यान्यथावस्यन्दितं भवेत्।

यथा छलितरामे-

सीता- जात। कल्यं खलु उपाध्यायेन मन्तव्यं तर्हि स राजा विनयेन पणायितव्यः।

लवः- अथ किमावाभ्यां राजोपजीविभ्यां भवितव्यम्

सीता- जात स खलु युष्माकं पिता।

लवः -किमावयोः रघुपतिः पिता।

सीता- साशङ्कम् मा अन्यथा शङ्कध्वम्। न खलु युष्माकं सकलाया एव पृथिव्या इति।

अत्र श्रीरामः लवकुशयोः पिता अस्तीति अनवधानतया वदन्ती सीता पुनः तथ्यनिगूहनार्थं राजा प्रजानां पितृस्थानीय एव इति वदति।

११ नालिकालक्षणं-प्रहेलिकैव हास्येन युक्ता भवति नालिका

संवरणकारी उत्तरमेव प्रहेलिका।

सुसङ्गता- सखि यस्य कृते त्वम् आगता स इह एव तिष्ठति।

सागरिका- कस्य कृते अहं आगता।

सुसङ्गता- ननु खलु चित्रफलकस्य।

अत्र राज्ञः कृते सागरिका आगता इति स्पष्टं ध्वनयते।

१२-असत्प्रलापलक्षणं- असत्प्रलापो यद्वाक्यमसंबद्धं तथोत्तरम्।

अगृह्णतोऽपि मूर्खस्य पुरो यच्च हितं वचः॥

असत्प्रलापः त्रिविधः-१ असंबद्धं वाक्यं

२ असंबद्धं उत्तरं ३ मूर्खस्य पुरतः कृता हितोक्तिःच।

उदाः- यथा प्रभावत्यां सहकारवल्लीमवलोक्य स्व प्रियेति चिन्तयतः प्रद्युम्नस्य उक्तिः। तृतीयस्य उदाहरणं तु वेणीसंहारे दुर्योधनं प्रति गान्धारिवाक्यम्।

१३ व्याहारलक्षणम्- व्याहारो यत्परस्यार्थे हास्यक्षोभकरं वचः।

यथा मालविकाग्निमित्रे- लास्यप्रयोगावसाने मालविका उपदेशशुद्धा नास्तीति उक्त्वा विदूषकः राज्ञः कृते तस्याः गमनं वारयति। पुनः गणदासेन क्रमभेदविषये पृष्टः सन् विदूषकः मालविकया प्रथमं ब्राह्मणपूजा न कृता इति वदति। तच्च हास्यं जनयति।

१४ मृदवलक्षणम्- दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं हि तत्।

यथा-

प्रिय जीवितताक्रौर्यं निःस्नेहत्वं कृतघ्नता।
भूयस्त्वद्दर्शनादेव ममैते गुणतां गताः॥

अत्र विरहिणी काचित् स्त्री प्रियस्य दर्शने सति विरहावस्थायां दोषभूताः  एव इदानीं गुणः जाता इति वदति।

तस्यास्तद्रूपसौदर्यं भूषितं यौवनश्रिया।
सुखैकायतनं जातं दुःखायैव ममाधुना॥

अत्र विरही कश्चित् पुरुषः स्व प्रियां स्मरन् तस्याः गुणाः इदानीं दोषाः जाताः इति वदति। एवं मृदवद्वयस्यापि उदाहरं दत्तम्।

१० प्रहसनलक्षणं-

भाणवत्सन्धिसन्ध्यङ्गलास्याङ्गाङ्कैर्विनिर्मितम्।
भवेत्प्रहसनं वृत्तम् निन्द्यानां कविकल्पितम्।
अत्र नारभटी नापि विष्कम्भकप्रवेशकौ।
अङ्गी हास्यरस्यस्तत्र वीथ्यङ्गानां स्थितिर्न वा।
तपस्विभगवद्विप्रप्रभृतिष्वत्र नायकः।
एको यत्र भवेद्धृष्टो हास्यं तच्छुद्धमुच्यते।
आश्रित्य कञ्चन जनं संकीर्णमिति तद्विदुः।
शुद्धस्य उदाहरणं कन्दर्पकेलिः संकीर्णस्य उदाहरणं धूर्तचरितम्।

प्रहसनविशेषानाह-

१  निन्द्यानां कविकल्पितम्  वृत्तम्।
२ आरभटीवृत्तिः विष्कम्भकप्रवेशकौ वा न भवन्ति।
३ अङ्गी हास्यरसः
४ वीथ्यङ्गानां स्थितिः न भवति
५  तपस्विभगवद्विप्रप्रभृतिष्वत्र नायकः।
६ बेदद्वयं शुद्धं सङ्कीर्णमिति।
७ यस्मिन् एकः धृष्टः नायकः तत् शुद्धं। शुद्धस्य उदाहरणं कन्दर्पकेलिः
८ धृष्टभिन्नं जनं आश्रित्य कृतं संकीर्णं। संकीर्णस्य उदाहरणं धूर्तचरितम्।

☼ ☼ ☼ ☼ ☼ ☼ ☼ ☼ ☼

# Module IV

अष्टादश उपरूपकाणि सन्ति। तानि तु-

नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम्।

प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा।

संलापकं श्रीगदितं शिल्पकं च विलासिका।

दुर्मल्लिका प्रकरणी हल्लीशो माणिकेति च।

अष्टादश प्राहुरुपरूपकाणि मनीषिणः।

विना विशेषम् सर्वेषाम् लक्ष्म नाटकवन्मतम्॥

## उपरूपकाणां लक्षणमुच्यते-

नाटिकालक्षणं-

नाटिका क्ळृप्तवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका।
प्रख्यातो धीरलिलितस्तत्र स्यान्नायको नृपः।
स्यादन्तःपुरसम्बद्धः सङ्गीतव्यापृताथवा।
नवानुरागा कन्यात्र नायिका नृपवंशजा॥
सम्प्रवर्तेत नेतास्यां देव्यास्त्रासेन शङ्कितः।
देवी भवेत्पुनर्ज्येष्ठा प्रगल्भा नृपवंशजा॥
पदे पदे मानवती तद्वशः सङ्गमोद्वयोः।
वृत्तिः स्यात्कैशिकी स्वल्पविमर्शाः सन्धयः पुनः।

नाटिकायाः विशेषानाह-

१ कविकल्पितम् इतिवृत्तं।

२ चतुरङ्किका।

३ प्रख्यातः धीरललितः च नृपः नायकः।

४ नृपवंशजा अन्तःपुरसम्बद्धा सङ्गीतव्यापृता नवानुरागा कन्यात्र नायिका।

५ ज्येष्ठा प्रगल्भा नृपवंशजा देवी।

६ कैशिकी वृत्तिः।

७ स्वल्पविमर्शाः सन्धयः। उदा- रत्नावली

त्रोटकलक्षणं- सप्ताष्टनवपञ्चाङ्कं दिव्यमानुषसंश्रयं।
त्रोटकं नाम तत्प्राहुः प्रत्यङ्कं सविदूषकम्।

त्रोटकविशेषानाह-

१ अङ्कसंख्या सप्त - अष्ट- नव-पञ्च वा।

२ दिव्यमानुषसम्श्रयं इतिवृत्तं।

३ सर्वेषुः अङ्केषु विदूषकः भवेत्।

उदा- विक्रमोर्वशीयं।

गोष्ठीलक्षणमाह- प्राकृतैर्नवभिः पुंभिर्दशभिर्वाप्यलंकृता।
नोदात्तवचना गोष्ठी कैशिकीवृत्तिशालिनी।
हीना गर्भविमर्शाभ्यां पञ्चषड्योषिदन्विता।
कामशृङ्गारसंयुक्ता स्यादेकाङ्कविनिर्मिता।

गोष्ठीविशेषानाह-

१ प्राकृताः नव-दश वा संख्यकाः पुरुषाः।

२ संस्कृतभाषाहीना।

३ वृत्तिः कैशिकी।

४ गर्भविमर्शसन्धी न भवतः।

५ पञ्च- षट् वा स्त्रियः।

६ कामशृङ्गारः रसः।

७ एकाङ्कविनिर्मिता। उदा- रैवतमदनिका।

सट्टकलक्षणमाह- सट्टकम् प्राकृताशेषपाठ्यं स्यादप्रवेशकम्।
न च विष्कम्भकोऽप्यत्र प्रचुरश्चाद्भुतो रसः।
अङ्का जवनिकाख्याः स्युः स्यादन्यन्नाटिकासमम्।

सट्टकविशेषानाह-

१ प्राकृतभाषायां विनिर्मितम्।

२ प्रवेशकः विष्कम्भो वा न भवेत्।

३ अद्भुतरसप्रचुरः।

४ जवनिकाख्याः अङ्काः। उदा- कर्पूरमञ्जरी।

नाट्यरासकलक्षणं-

नाट्यरासकमेकाङ्कं बहुताललयस्थिति ।
उदात्तनायकं तद्वत्पीठमर्दोपनायकम् ।
हास्योऽङ्ग्यत्र सशृङ्गारो नारी वासकसज्जिका ।
मुखनिर्वहणे सन्धी लास्याङ्गानि दशापि च ।
केचित्प्रतिमुखम् सन्धिमिह नेच्छन्ति केवलम् ॥

नाट्यरासकविशेषानाह-

१ एकाङ्कं
२ नायकः उदात्तः
३ उपनायकः पीठमर्दः
४ सशृङ्गारः हास्यः प्रधानरसः
५ वासकसज्जिका नायिका
६ प्रतिमुखसन्धिः न भवेत्   उदा- नर्मवती ।

प्रस्थानकलक्षणं-

प्रस्थाने नायको दासो हीनः स्यादुपनायकः ।
दासी च नायिका वृत्तिः कैशिकी भारती तथा ॥
सुरापानसमायोगादुद्दिष्टार्थस्य संहृतिः ।
अङ्कौ द्वौ लयतालादिविलासो बहुलस्तथा ॥

प्रस्थानकविशेषानाह-

१ दासः नायकः
२ हीनः उपनायकः
३ द्वौ अङ्कौ   उदा-शृङ्गारतिलकम् ।

उल्लप्यलक्षणम्- उदात्तनायकं दिव्यवृत्तमेकाङ्कभूषितम् ।
शिल्पकाङ्गैर्युतं हास्यशृङ्गारकरुणैः रसैः ॥
उल्लाप्यं बहुसंग्राममस्रगीतमनोहरम् ।
चतस्रो नायिकास्तत्र त्रयोऽङ्काः इति केचन ।

उल्लप्यविशेषानाह-

१ धीरोदात्तः नायकः
२ दिव्यं इतिवृत्तं
३ एकाङ्कं
४ रसे हस्य-शृङ्गार-करुणे ।
५ चतस्रः नायिकाः   उदा- देवीमहादेवम् ।

काव्यलक्षणम्-

काव्यमारभटीहीनमेकाङ्कं हास्यसङ्कुलम्।

खण्डमात्राद्विपदिकाभग्नतालैरलंकृतम्॥

वर्णमात्राछड्डलिकायुतं शृङ्गारभाषितम्।

नेता स्त्री चाप्युदात्ताऽत्र सन्धी आद्यौ तथान्तिमः।

काव्यविशेषानाह-

१ आरभटीहीनं

२ एकाङ्कं

३ हास्यसङ्कुलम्।

४ सन्धी आद्यौ अन्तिमः च उदा-यादवोदयं।

प्रेङ्खणलक्षणम्-

गर्भविमर्शरहितं प्रेङ्खणं हीननायकम्।

असूत्रधारमेकाङ्कमविष्कम्भप्रवेशकम्॥

नियुद्धसम्फेटयुतं सर्ववृत्तिसमाश्रितम्।

नेपथ्ये गीयते नान्दी तथा तत्र प्ररोचना॥

प्रेङ्खणविशेषानाह-

१ गर्भविमर्शरहितं

२ हीनः नायकः

३ सूत्रधाररहितं

४ एकाङ्कं

५ विष्कम्भप्रवेशकरहितं

६ नियुद्धसम्फेटयुत उदा- बालिवधम्।

रासकलक्षणं-

रासकं पञ्चपात्रं स्यान्मुखनिर्वहणान्वितम्।

भाषाविभाषाभूयिष्ठम् भारतीकैशिकीयुतम्॥

असूत्रधारमेकाङ्कं सवीथ्यङ्गं कलान्वितम्।

श्लिष्टनान्दीयुतं ख्यातनायिकं मूर्खनायकम्॥

उदात्तभावविन्याससंश्रितं चोत्तरोत्तरम्।

इह प्रतिमुखं सन्धिमपि केचित्प्रचक्षते।

रासकविशेषानाह-

१ पञ्चपात्रं

२ मुखनिर्वहणान्वितम्

३ भारतीकैशिकीयुतम्

४ असूत्रधारं

५ एकाङ्कं

६ सवीथ्यङ्गं

७ प्रख्याता नायिका

८ मूर्खः नायकः उदा- मेनकाहितम्।

संलापकलक्षणं-

संलापकेऽङ्काश्चत्वारस्त्रयो वा नायकः पुनः।

पाषण्डः स्याद्रसस्तत्र शृङ्गारकरुणेतरः॥

भवेयुः पुरसंरोधच्छलसंग्रामविद्रवाः।

न तत्र वृत्तिर्भवति भारती न च कैशिकी॥

संलापकविशेषानाह-

१ अङ्काः चत्वारः त्रयः वा

२ नायकः पाषण्डः

३ शृङ्गारकरुणेतरः रसः

४ भारती कैशिकी च वृत्तिः न भवति

उदा- मायाकापालिकम्।

श्रीगदितलक्षणं-

प्रख्यातवृत्तमेकाङ्कं प्रख्यातोदात्तनायकम्।

प्रसिद्धनायिकं गर्भविमर्शाभ्यां विवर्जितम्।

भारतीवृत्तिबहुलं श्रीतिशब्देन संकुलम्।

मतं श्रीगदितं नाम विद्वद्भिरुपरूपकम्॥

श्रीरासीना श्रीगदिते गायेत्किञ्चित्पठेदपि।

एकाङ्को भारतीप्राय इति केचित्प्रचक्षते॥

श्रीगदितविशेषानाह-

१ प्रख्यातं वृत्तं

२ एकाङ्कं

३ प्रख्यातः उदात्तः च नायकः

४ प्रसिद्धा नायिका

५ गर्भविमर्शाभ्यां विवर्जितम्

६ भारतीवृत्तिबहुलं

उदा- क्रीडारसातलम्।

शिल्पकलक्षणम्-

चत्वारः शिल्पकेऽङ्काः स्युश्चतस्रो वृत्तयस्तथा।
अशान्तहास्याश्च रसा नायको ब्राह्मणो मतः।
वर्णनात्र श्मशानादेर्हीनः स्यादुपनायकः।
सप्तविंशतिरङ्गानि भवन्त्येतस्य तानि तु॥
आशंसातर्कसन्देहतापोद्वेगप्रसक्तयः।
प्रयत्नग्रथनोत्कण्ठावहित्थाप्रतिपत्तयः॥
विलासालस्यबाष्पाणि प्रहर्षाश्वासमुढताः।
साधनानुगमोच्छ्वासविस्मयप्राप्तयस्तथा॥
लाभविस्मृतिसंफेटा वैशारद्यं प्रबोधनम्।
चमत्कृतिश्चेत्यमीषां स्पष्टत्वाल्लक्ष्म नोच्यते॥

शिल्पकविशेषानाह-

१ चत्वारः अङ्काः

२ चतस्रः वृत्तयः

३ शान्तहास्यवर्जिताः रसाः

४ श्मशानादेः वर्णना

५ उपनायकः हीनः

६ सप्तविंशतिरङ्गानि

उदा- कनकावतीमाधवः।

विलासिकालक्षणम्।

शृङ्गारबहुलैकाङ्का दशलास्याङ्गसंयुता।
विदूषकविटाभ्यां च पीठमर्देन भूषिता।
हीना गर्भविमर्शाभ्यां सन्धिभ्यां हीननायका।
स्वल्पवृत्तासुनेपथ्या विख्याता सा विलासिका॥

विलासिकाविशेषानाह-

१ शृङ्गारबहुला

२ एकाङ्का

३ विदूषकविटाभ्यां पीठमर्देन च भूषिता

४ गर्भविमर्शाभ्यां सन्धिभ्यां हीना

५ हीनः नायकः

दुर्मल्लिकालक्षणम्-

दुर्मल्ली चतुरङ्का स्यात् कैशिकीभारतीयुता।

अगर्भा नागरनरा न्यूननायकभूषिता॥

त्रिनालिः प्रथमोऽङ्कास्यां विटक्रीडामयो भवेत्।

पञ्चनालिर्द्वितीयोऽङ्को विदूषकविलासवान्।

षण्णालिकस्तृतीयस्तु पीठमर्दविलासवान्।

चतुर्थो दशनालिः स्यादङ्कः क्रीडितनागरः॥

दुर्मल्लिकाविशेषानाह-

१ चतुरङ्का

२ कैशिकीभारतीयुता

३ अगर्भा

४ हीनः नायकः

उदा- बिन्दुमती।

प्रकरणिकालक्षणम्-

नाटिकैव प्रकरणी सार्थवाहादिनायका।

समानवंशजा नेतुर्भवेद्यत्र च नायिका॥

प्रकरणिकाविशेषानाह-

१ नायकाः सार्थवाहादयः

२ नेतुः समानवंशजा नायिका

हल्लीशलक्षणम्-

हल्लीश एक एवाङ्कः सप्ताष्टौ दश वा स्त्रियः।

वागुदात्तैकपुरुषः कैशिकीवृत्तिरुज्ज्वला।

मुखान्तिमौ तथा सन्धी बहुताललयस्थितिः।

हल्लीशविशेषानाह-

१ एकाङ्कः

२ स्त्रियः सप्ताष्टौ दश वा

३ उदात्ता वाग्

४ एकः पुरुषः

५ कैशिकीवृत्तिः

६ मुखसंहारौ सन्धी

उदा- केलिरैवतकम्।

भाणिकालक्षणं -

भाणिका श्लक्ष्णनेपथ्या मुखनिर्वहणान्विता।

कैशिकीभारतीवृत्तियुक्तैकाङ्कविनिर्मिता॥

उदात्तनायिका मन्दपुरुषात्राङ्गसप्तकम्।

उपन्यासोऽथ विन्यासो विबोधः साध्वसं तथा॥

समर्पणं निवृत्तिश्च संहार इति सप्तमः।

उपन्यासः प्रसङ्गेन भवेत्कार्यस्य कीर्तनम्।

निर्वेदवाक्यवुत्पत्तिर्विन्यासः इति स स्मृतः।

भ्रान्तिनाशोविबोधः स्यान्मिथ्याख्यानं तु साध्वसं।

सोपालम्भवचः कोपपिडयेह समर्पणम्।

निदर्शनस्योपन्यासो निवृत्तिरिति कथ्यते॥

संहार इति च प्राहुर्यत्कार्यस्य समापनम्।

भाणिकाविशेषानाह-

१ मुखनिर्वहणौ सन्धी

२ कैशिकीभारती वृत्तीः

३ एकाङ्कविनिर्मिता

४ नायिका उदात्ता

५ हीनः नायकः

६ उपन्यासोऽथ विन्यासो विबोधः साध्वसं समर्पणं निवृत्तिश्च संहार इति सप्तैरङ्गैर्युक्तं

उदा- कामदत्ता।

✦✦✦✦✦

श्रव्यकाव्यलक्षणं तद्भेदाश्च -

श्रव्यं श्रोतव्यमात्रं तत्पद्यगद्यमयं द्विधा।

पद्यलक्षणं - छन्दोबद्धपदं पद्यं।

तच्च पद्यं पादसंख्यां आश्रित्य मुक्तकं युग्मकं सन्दानितकं कलापकं कुलकं इति विभज्यते। तेषां विस्तरः प्रस्तूयते-

पद्यान्तरापेक्षारहितः श्लोकः - मुक्तकम्।

सापेक्षाभ्यां द्वाभ्यां श्लोकाभ्यां युक्तं - युग्मकं।

मिथः सापेक्षैः त्रिभिः श्लोकैः युक्तं - सन्दानितकं।

मिथः सापेक्षैः चतुर्भिः श्लोकैः युक्तं - कलापकं।

मिथः सापेक्षैः पञ्चभिः श्लोकैः युक्तं - कुलकं।

✦✦✦✦✦

महाकाव्यलक्षणं एवं दीयते।

सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।
एकवंशभवा भूपाः कुलजा बहवोऽपि वा॥
शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते।
अङ्गानि सर्वेपि रसाः सर्वे नाटकसन्धयः।
इतिहासोद्भवं वृत्तमन्यदा सज्जनाश्रयम्।
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत्॥
आदौ नमस्त्क्रियाशीर्वा वस्तुनिर्देश एव वा।
क्वचिन्निन्दा खलादीनां सतां च गुणकिर्तनम्।
एकवृत्तमयैः पद्यरवसानेऽन्यवृत्तकैः।
नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह॥
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते।
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्।
संध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः।
प्रातर्मध्याह्नमृगयाशैलर्तुवनसागराः।
संभोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः।
रणप्रयाणोपयममन्त्रपुत्रोदायादयः॥
वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह।
कवेर्वृत्तस्य वा नाम्ना नायकयेतरस्य वा।
नामास्य सर्गोपादेयकथया सर्गनाम तु।

अस्य विश्लेषणं कुर्मः।

नायकः - धीरोदात्तः एकः नृपः एकवंशभवाः भूपाः वा।

मुख्यरसः - वीरः शृङ्गारः शान्तः वा।

अमुख्यरसाः - अन्ये सर्वे।

इतिवृत्तं - इतिहासोद्भवं अथवा सज्जनाश्रितं।

सर्गाणां संख्या -अष्टाधिकाः।

वर्ण्याः- संध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः।

प्रातर्मध्याह्नमृगयाशैलर्तुवनसागराः।

संभोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः।

रणप्रयाणोपयममन्त्रपुत्रोदायादयः॥

महाकाव्यस्य नाम - कविं इतिवृत्तं नायकं प्रतिनायकं वा आश्रित्य कुर्यात्।

सर्गनाम - सर्गोपादेयकथां आश्रित्य।

ऋषिप्रणीतेषु महाभारतादिषु महाकाव्येषु सर्गाः आख्यानसंज्ञकाः भवन्ति।प्राकृतमहाकाव्येषु सर्गाः आश्वाससंज्ञकाः भवन्ति। तत्र स्कन्धक-गलितक-संज्ञकानि वृत्तान्यपि भवन्ति। उदा- सेतुबन्धः। अपभ्रंशभाषानिबद्धे महाकाव्ये सर्गाः कुडबकसंज्ञकाः भवन्ति। उदा- कर्णपराक्रमः।

काव्यलक्षणं आह- भाषाविभाषा नियमात्काव्यं सर्गसमुज्झितम्।
एकार्थप्रवणैः पद्यैः सन्धिसामग्र्यवर्जितम्। उदा- भिक्षाटनम्।

खण्डकाव्यलक्षणं आह- खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च। उदा- मेघदूतं।

कोषलक्षणमाह- कोषः श्लोकसमूहस्तु स्यादन्योन्यानपेक्षकः। उदा- मुक्तावली।

✦✦✦✦✦

गद्यलक्षणं तद्भेदाश्च-

गद्यलक्षणं- वृत्तगन्धोज्झितं गद्यम्। तदेव गद्यं मुक्तकं वृत्तगन्धि उत्कलिकाप्रायं चूर्णकं चेति चतुर्विधं भवति। तत्र समासरहितं मुक्तकं। उदा- गुरुर्वचसि पृथुरुरसि।पद्यांशैः युक्तं वृत्तगन्धि । उदा- समरकण्डूलनिबिडभुज-दण्डकुण्डलीकृतकोदण्डशिञ्जिनीटंकारोज्जागरितवैरिनगर-। अत्र कुण्डलीकृतकोदण्ड इत्यत्र अनुष्टुप्वृत्तस्य पादः।

दीर्घसमासाढ्यं उत्कलिकाप्रायं । उदा- अनिशविसृमरनिशितशरविसरविदलितसमरपरिगतप्रवरपरबल इति। अल्पसमासकं चूर्णकं।उदा- गुणरत्नसागर। जगदेकनागर। कामिनीमदन। जनरञ्जन - इति।

## कथा आख्यायिका च-

गद्यस्य इतिवृत्तं कथनं च आश्रित्य कथा आख्यायिका च इति भेदद्वयं विद्यते। तत्र

कथा- शृङ्गारादिरसोपेतं वस्तु गद्यरूपेण एव विरचितं भवेत्। कथायां क्वचित् आर्यावृत्तनिबद्धं पद्यं क्वचित् वक्र-अपरवक्रनामकवृत्ताभ्यां निबद्धानि पद्यानि वा भवेत्। कथायाः आरम्भे देवादीनां नमस्कारः दुर्जनादेः चरित्रवर्णनं च भवेद् ।यथा- कादंबरी।

आख्यायिका- तस्यां कवेः वंशानुकीर्त्तनं अन्येषां कवीनां चरित्रवर्णनं च स्यात्। कथांशानां व्यवच्छेदकः आश्वास संज्ञकाः भवन्ति। विषयान्तरवर्णनच्छलेन अर्यावक्रापरवक्रवृत्तनिबद्धैः श्लोकैः भाव्यर्थसूचनं दृश्यते। यथा- हर्षचरितं।

## चम्पूलक्षणं-

गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते।यथा- चम्पूरामायणं।

**विरुदलक्षणं-** गद्यपद्यमयी राजस्तुतिः विरुदमुच्यते। यथा- विरुदमणिमाला।

**करम्भकलक्षणं -** करम्भकं तु भाषाभिः विविधाभिः विनिर्मितं।यथा- प्रशस्तिरत्नावली।

☼ ☼ ☼ ☼ ☼ ☼ ☼ ☼ ☼

# MODEL QUESTION PAPER

# 4TH SEMESTER BA SANSKRIT

## CORE COURSE- NATYASIDHANTA

(Answers may be written in Sanskrit)

**I A.** कोष्ठात् समुचितं पदं स्वीकृत्य पूरयत। **(12 x1/4= 3)**

1 . कः काव्यार्थम् आस्थापयेत् ......... (स्थापकसूत्रधारः, सूत्रधारः, नटः)

2. महाकाव्येषु कीदृशः नायकः ......... (धीरोदात्तः धीरशान्तः, धीरललितः)

3. साहित्यदर्पणस्य कर्ता कः? (सदानन्दः, विश्वनाथः, दण्डी)

4. प्रदत्तेषु उपरूपकं भवति .........।( प्रकरणं,वीथीं, त्रोटकम्)

**B.** पूरयत ।

5. अभिनयः ...... भवेत्।

6. ...... संस्कृतप्रायो वाग्व्यापारो नटाश्रयः।

7. वृत्तगन्धोज्झितम् ...... ।

8 अपभ्रंशभाषायां रचितेषु महाकाव्येषु सर्गाः......इति व्यवह्रियन्ते। ।

**C.** पदेनैकेन उत्तरं लिखत।

9. चम्पूलक्षणं लिखत?

10. श्रव्यलक्षणं भेदद्वयम् च लिखत?

11.आर्षे महाकाव्ये सर्गाः कथं व्यवह्रियन्ते?

12. कथायाः लक्षणं किम्?

**PART-B**

**II** वाक्येनैकेन द्वाभ्यां व प्रश्नानाम् उत्तरं लिखत। **(1 x9=9)**

13. दृश्यकाव्यस्य रूपकमिति संज्ञा कुतः?
14. अभिनयः कतिविधः के च ते?
15. गार्भाङ्कः नाम किम्?
16. पञ्चप्रस्तावनाभिदा – के ते?
17. अर्थप्रकृतयः के ?
18. छन्दोबद्धं पद्यं तेन त्यक्तेन ...... ।

    द्वाभाम् च ...... । ......त्रिभिरिष्यते।

    ......चतुर्भिश्च। पञ्चभिः...... मतम्॥ पूरयत ?
19. सन्देशकाव्यलक्षणं लिखत ?
20. विरुदं नाम किं?
21. को नाम कोषः?

**PART –C**

**III** लघुटिप्पणीः लिखत। पञ्चप्रश्नाः समाधेयाः। (5 x2)

22. नान्दी।
23. अङ्कलक्षणं ।
24. प्रस्तावना ।
25. प्रवेशकः।
26. आख्यायिका।
27. नाटिका।
28. गद्यस्य भेदचतुष्ट्यं .

**PART – D**

IV. प्रश्नद्वयमधिकृत्य उपन्यस्त। (2 x4)

29 नाटकलक्षणं निरूपयत ?

30. अर्थोपक्षेपकाः के सोदाहरणं निरूपयत?

31. महाकाव्यलक्षणं निरूपयत?

………………..